चतुर्थाध्याये प्रथमं ब्राह्मणम्

जनको ह वैदेह आसाञ्चक्रेऽथ ह याज्ञवल्क्य आवव्राज तं होवाच याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानीत्युभयमेव सम्राडिति होवाच ॥१॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलनिर्वाग्वै

विज्ञानमानन्दं ब्रह्मेति वाक्येन जगत उत्पत्त्यादिकारणभूतं परमात्मानं साक्षादेव निरूप्य वागादिदेवताद्वारेण परम्परयापितदधिगमः कर्तव्य इत्यधिगमोपायप्रदर्शनाय ब्राह्मणमारभ्यते ।

(ओं जनको ह वैदेह इत्यादि) जनको विदेहो विदेहे मिथिलायां भवो वैदेहो विगतदेहाभिमानः आसाञ्चक्रे सभायां स्थितोऽभवत् । लोकेभ्यो दर्शनाय सभास्थोऽभवदित्यर्थः । अथ सभायां दर्शनायस्थित्यनन्तरं तत्र याज्ञवल्क्य नामको ऋषिराववाजागतवान् । तमागतं याज्ञवल्क्यं दृष्ट्वा अर्घ्यपाद्यादिभिस्तं प्रपूज्य जनक उवाच प्रोक्तवान् । हे याज्ञवल्क्य किमर्थमचारीः । कं प्रयोजनविशेषमासाद्य आगतोसि किं पशून् गवादिकान् इच्छन् आगतोऽसि ? अथवा अण्वन्तान् । अणोः सूक्ष्मस्य प्रत्यगात्मादिवस्तुन अन्तान् निर्णयान् वा कर्तुमागतोसि तद्वद । एवं जनक वचनं श्रुत्वा याज्ञवल्क्य उवाच हे सम्राट् सार्वभौम सर्वासु आपश्चिमसमुद्रात् पूर्वसमुद्रपर्यन्तं हिमालयदारभ्य कन्याकुमारिकापर्यन्तपृथिवीसु अप्रतिहता आज्ञा विद्यते यस्य स सार्वभौमः सम्राट् । अथवा वाजपेययागानुष्ठाता राजा सम्राट् इति ॥१॥

(यत्ते इत्यादि) हे राजन् ते तुभ्यं कश्चित् ब्रह्मोपदेष्टा यदब्रवीत् प्रोक्तवान् । यतस्त्वमनेकाचार्योपसेवी । अतस्ते यदुक्तमन्येन तदहं शृणवाम श्रोतुमिच्छामि तच्छ्रुत्वा तदनन्तरं तत्र यदुपदेष्टव्यमंशमवशिष्टं स्यात्तदह

ब्रह्मेति यथा मातृमान् पितृमानाचार्य्यवान् ब्रूयात्तथा तच्छैलिनोऽब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किंस्यादित्यब्रवीत्तु ते तस्यायतनं

मुपदेक्ष्यामीत्यर्थः। एवं याज्ञवल्क्यवचनं श्रुत्वा जनकः प्राह–

(अब्रवीन्मे इत्यादि) जित्वा एतन्नामक आचार्यः शैलिनिः शिलिनस्यापत्यं पुमान्। वाग्वैब्रह्मेति अब्रवीत्। ब्रह्म प्रतीकतया वाच एवोपासनं विधेयमिति स मह्यमुक्तवानिति। अनुमोदयन् याज्ञवल्क्यः प्राह–

(यथेत्यादि) हे सम्राट् यथा येन प्रकारेण मातृमान् माता विद्यतेऽनुशासनकर्त्री यस्य स मातृमान्। पितृमान् पिता विद्यते अनुशासनकर्ता यस्य स पितृमान्। आचार्यवान् आचार्यो विद्यते अनुशासनकर्ता यस्य स आचार्यवान्। तत्र माता जननी। पिता उत्पादको हितोपदेष्टा आचार्य उपनयनादि संस्कारं कृत्वा वेदाध्यापकः तथोक्तम् "उपनीय गुरुः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।" इति मनुस्मृतेः। उपनयनात्पूर्वं मातापितरौ अनुशासनं कुर्वतः, उपनयनादनन्तरमाचार्यो अनुशास्ति। ततश्च यथा मात्रा पित्रा आचार्येण चानुशिष्टो वदति तथैव तुभ्यं शैलिनिराचार्यः प्रोक्तवान् वाग्वै ब्रह्मेति सम्यगेवोपदेशं स दत्तवानित्येवं याज्ञवल्क्येनानुमोदितः। वाचः कथं ब्रह्मत्व तत्रोपपत्तिं दर्शयति

(अवदतो हीत्यादि) अवदतः किंस्यादिति वाचा रहितस्य पुरुषस्य किं स्यात् न किमपीति। इह लौकिकं परलौकिकं वा किंचिदपि साध्यं मूकस्य सिद्धं न भवति मूकस्य किमपि कार्यं न सिद्ध्यतीत्यर्थः। अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्। परंतु हे राजन् तस्यायतनं प्रतिष्ठां किमब्रवीदिति कथय। तत्रायतनं शरीरम् प्रतिष्ठा तु कालत्रयेपि आश्रयः। एतद्द्वयविषये किमुक्तवान् शैलिनिरिति। जनकः प्राह–

प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्राडिति होवाच वाचा वै

(न मेऽब्रवीदिति) हे याज्ञवल्क्य स तु आयतनं प्रतिष्ठाविषये किमपि नोक्तवानिति। ततो याज्ञवल्क्यः प्राह—

(एकपाद्वेति) हे सम्राट् एतद्वाग्रूपं ब्रह्म एकपाद्। एकः पादोऽस्य तत् एकपाद्। ब्रह्म तु चतुष्पाद्निर्दिष्टं शास्त्रे शैलिनिस्तु एकपादवत एवोपदेशं दत्तवान्, पादत्रयन्तु अवशिष्टमेव। ततश्च चतुष्पादः ब्रह्मण एव साक्षात् परंपरयोपासने तदुपासनं सफलं स्यात् न तु पादत्रयशून्यैकपादवत् उपासनं फलाय स्यात्। एवं श्रुत्वा जनकः प्राह—

(स वै नो इत्यादि) हे याज्ञवल्क्य स त्वं विद्वान् नोऽस्मभ्यं तदायतनं प्रतिष्ठां च ब्रूहि कथय। यत्तेन कथितं तत् त्वयैव कृपया प्रतिपादनीयमिति। याज्ञवल्क्यः प्राह—

(वागेवेत्यादि) वागेवायतनम् वगभिमानिदेवतायामध्यस्यमानस्य ब्रह्मणो वागेवायतनं शरीरम्। आकाशः प्रतिष्ठा तत्राव्याकृताकाशः परमव्योम वा प्रतिष्ठा वाच्यध्यस्यमानस्यब्रह्मणः प्रतिष्ठा कालत्रयेपि आश्रयः। एतद् वाग्रूपं ब्रह्म प्रज्ञा इति कृत्वोपासीतोपासनं कुर्यादिति। पुनरपि जनकः पृच्छति

(का प्रज्ञतेत्यादि) हे याज्ञवल्क्य इयं प्रज्ञतानाम का। यथा प्रतिष्ठांशो वाचोऽभिन्ना तथा प्रज्ञापीयं वाचोऽभिन्ना भिन्ना वेति जनकस्य प्रश्नः। यथा वाचा प्रतिष्ठांशोऽभिन्न स्तथा प्रज्ञापि तदभिन्नैवेत्युत्तरयति

(वागेवेत्यादि) हे सम्राट् वागेव प्रज्ञा यथा प्रतिष्ठांशो वाचोऽभिन्नस्तथा प्रज्ञापि वाचोऽभिन्नैवेति। तत्रोपपत्तिं दर्शयति।

ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच सम्राड्बन्धुः प्रज्ञायते ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयञ्च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट प्रज्ञायंते वाग्वै सम्राट् परमं

हे सम्राट् वाचैव बन्धुः प्रज्ञायते अयमस्माकं बन्धुबान्धवादिरिति वाणीद्वारेणैव प्रकाशितं मूकस्य तत्प्रख्यानासंभवात् । तथा ऋग्वेदादिरपि वाचैव प्रकाशितो भवति मूकेन तत्प्रकाशासम्भवात् । इष्टं नाम यागादिनिमित्तकं धर्मजातं हुतं नाम अग्निहोत्रानिमित्तकं धर्म जातम्।आशितम् अन्नदानादि जनितं धर्मजातम् । पायितं प्रपादौ जलदानादिनिमित्तकं धर्मजातम् । किं बहुना इह लोकः परलोकः सर्वाणि भूतानि सर्वमपिवाणीद्वारेणैव प्रकाशितं भवति । हे सम्राट् अतः वागेव परमं ब्रह्म अतो वाग्देवब्रह्मणउपासनमवश्यं कर्तव्यमित्यर्थः । सम्प्रति वाग्देवतायां ब्रह्मोपासनायाः फलं दर्शयितुमाह–

(नैनं वाग्जहातीत्यादि) एनं वाग्देवतायामध्यस्यमानब्रह्मोपासकं पुरुषम् वाक् अधीता ब्रह्मविद्या कथमपि न जहाति न परित्यजति । तद्विद्याया विस्मरणं कदाचिदप्यस्य न भवतीत्यर्थः। तथा सर्वाणि भूतानि एनमुपासकं वलिदानादिभिरभिरक्षन्ति पालयन्ति । देवो भूत्वा उपास्यमानवागधिष्ठातृदेवतासायुज्यं प्राप्य कर्मदेवत्वमवाप्य देवानप्येति देवान् आजानसिद्धदेवान् आप्नोति प्राप्नोति स्वाभाविकदेवभावमृतदन्तर्गतो भवतीत्यर्थः य उपासक एवं विद्वान् वाग्देवतोपासनं करोतीति ।

(हस्तिऋषभमित्यादि) एवं श्रुत्वा प्रहृष्टो जनको वैदेहस्तस्मै उपदेशकामो

जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥२॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदङ्कः शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्य्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो

वाच प्रोक्तवान् किमुवाच तत्राह हे याज्ञवल्क्य हस्ति ऋषभं गोसहस्रं ददामि दक्षिणा रूपेण। हस्तिसदृशो ऋषभो बलीवर्दो यस्मिन् गोसहस्रे तत्ते ददामि। बलीवर्दसहितं गोसहस्रमित्यर्थः। अथवा ऋषभपदं श्रेष्ठतावाचकं तथा च हस्तिप्रवराणां सहस्रं ते दक्षिणां ददामीति जनकः प्रोक्तवानिति। एवं श्रुत्वा स याज्ञवल्क्यः प्रोवाच प्रोक्तवान्। हे जनक मे मम पिता एवममन्यत। किममन्यत नाननुशिष्य हरेत्। शिष्यं सम्यगननुशिष्य तदीयं धनं न हरेत् यावत्पर्यन्तं शिष्यस्य सम्यगवबोधो न भवेत् तावत्पर्यन्तं ततो धनं दक्षिणारूपेण न गृह्णीयादेवं मे पिता मां बाधितवानतोनेदानीं दक्षिणो ग्रहीष्यामि किन्तु सम्यगनुशिष्यैव हरिष्यामि न तु ततः प्रागिति भावः ॥२॥

(यदेवते कश्चिदित्यादि) हे सम्राट् यदेवते कश्चिदाचार्योऽब्रवीत् तन्मे कथय। मे मह्यं नामत उदङ्कः शौल्बायनः शुल्वस्यापत्यं पुमान् एवमब्रवीत्। ह प्राणो ब्रह्मेति ततो याज्ञवल्क्यः प्राह यथा मातृमान् मात्रादिभिरनुशिष्टो ब्रूयात् तथैव तेऽब्रवीत् सम्यगेवोक्तवान् अनुमोदामितदीयमुपदेशत्वम्। यतः प्राणरहितस्य किमप्यैहिलौकिकं पारलौकिकं वा कार्यं जातं किमपि सिद्धं न भवति परन्तु प्राणब्रह्मणः आयतनं प्रतिष्ठांच किमबोचत् नैव किंचिदब्रवीत्। ततो याज्ञवल्क्यः प्राह एकपात् एतद्ब्रह्मेति

ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाशः प्रतिष्ठा प्रियमित्येन-दुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट् कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णा-त्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट् कामाय प्राणो वै सम्राट परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्य-भिक्षरन्ति देवोभूत्वादेवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत माननुशिष्य हरेतेति ।।३।।

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे वर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान् पितृमानाचार्य्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्र-वीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का

अमस्तस्योपासनं फलायतनं स्यात् । तर्हि त्वमेव कथय तद्द्वयम् । प्राण-एवायतनं शरीरमाकाशः प्रतिष्ठाकालत्रयेप्याश्रयः एवं प्रियमिति कृत्वो-पासीत् । इयं प्रियता प्राणाद्भिन्नाऽभिन्नेति प्रश्ने प्राण एव प्रियता अभेद-एवोभयोः । हे सम्राट् प्राणस्यैव कामाय अयाज्यमपि याजयति लोकः यस्मात्प्रतिग्रहणे दोषस्तत्सकाशादपि दक्षिणां गृह्णाति । यत्र च प्राण-वधशंकाचोरव्याघ्रादिषु ततोऽपयाति प्राणकामायैव । अतो हे सम्राट् प्राणोतिशयेन प्रियः स एव परब्रह्मेति भावः ।।३।।

(यदेवते कश्चिदब्रवीदित्यादि) चतुर्थमंत्रः स च प्रथममन्त्रवदेव

सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्रामाह पश्यन्तमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञयल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ।।४।।

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभी विपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य । श्रोत्रमेवायतनमाकाशः प्रतिष्ठाऽनन्त इत्येनदुपासीत काऽनन्तता याज्ञवल्क्य दिश एव

व्याख्येयः । अत्रोपदेष्टा आचार्यो नामतो बर्कुः वार्ष्णः वृष्णस्यापत्यं पुमान् चक्षुर्ब्रह्मेत्युपदिष्टवान् चक्षुरभिमानी देव आदित्यः चक्षुरहितस्य किमपि कार्यं सिद्धं न भवति । चक्षुषा दृष्टं सत्यं भवति । यथा कश्चित्कमपि पृच्छति किममुमद्राक्षीस्त्वं स चेदद्राक्षमिति वदति तत्सत्यमेव भवति श्रोत्रादिना श्रुतेऽपि अन्यथाभावदर्शनात् । एवं च चक्षुषा परिदृष्टे यथा सत्यताप्रतीतिस्तथा प्रमाणान्तरावगते न भवति । अन्यत्सर्वं पूर्ववदेव व्याख्येयमिति ।।४।।

(यदेव ते कश्चिदब्रवीदित्यादि) पंचममंत्रः नामतो गर्दभीविपीतः श्रोत्रेण भारद्वाज आचार्यः श्रोत्रं ब्रह्मेत्युपदेशः अशृण्वतो हि किं स्यादिवं पूर्ववत् गोमनोऽधीनः प्रतिरूपः पुत्रः पितुरनुरूपस्तुल्य इत्यर्थः। मनो ह्यानन्द-

सम्राडिति होवाच तस्माद्वै सम्राडपि यां काञ्च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशो दिशो वै सम्राट् श्रोत्रं श्रोत्रं वै सम्राट् परमं ब्रह्म नैनं श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेह स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥५॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किंस्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवायतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत का आनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट् स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दः मनो वै सम्राट् परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच

कारणमतो मनस आनन्द श्रोत्रदेवतादिक् "दिशः श्रोत्र भूत्वा कर्णौ प्राविशदि" ति श्रुतेः दिक् श्रोत्रयोरभेद एव । पूर्ववत् अन्यत्सर्वं प्रथममंत्रवदेवेति ॥५॥

(यदेव ते कश्चिदब्रवीत्यादि) षष्ठमंत्रः, अत्र नाम्ना सत्यकामः जाबालो जबालाया अपत्यमाचार्यः मनो ब्रह्मेत्युपदेशः चन्द्रमा देवः आनन्दः

याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥६॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्य्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राट् सर्व्वेषां भूतानामायतनं हृदयं वै सम्राट् सर्व्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनं हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥७॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य प्रथमं ब्राह्मणम् । १॥

इति कृत्वोपासनम् । स्त्रियमभि । स्त्रियं प्रति मनसैव हार्यते स्त्रीसंभोगोमित्यर्थः । अन्यत्सर्वं पूर्ववदेवेति। ।६॥

(यदेव तेऽब्रवीदित्यादि) सप्तममंत्रः अत्र विदग्धः शाकल्य आचार्यः हृदयं ब्रह्मेतित्युपदेशः, देवता प्रजापतिः यतः सर्वाणि भूतानि हृदये एव प्रतिष्ठितानि भवन्ति । तस्माद्धृदयं स्थितिरिति स्थितिरूपेणोपासने कुर्यादिति अन्यत्सर्वं प्रथममंत्रवदेवेति ॥७॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये चतुर्थाध्यायस्य प्रथमं ब्राह्मणं समाप्तम् ॥१॥

चतुर्थाध्याये द्वितीयं ब्राह्मणम्

जनको ह वैदेहः कूर्च्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्य तु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन् रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मा-

जनको राजा याज्ञवल्क्यस्य ज्ञानविशेषातिशयमनुमीय ततो ज्ञानप्राप्तये समनुप्रसादेति शुश्रूषादक्षिणयोर्ज्ञानप्रा ो कारणतां दर्शयितुं द्वितीयं ब्राह्मणमवतारयति ।

(जनको ह वैदेह इत्यादि) नाम्ना जनको विदेहाधिपतिस्तद्देशोद्भवो विगतदेहाभिमानो भगवदाराधनैकपरः कूर्चादासनविशेषात् सिंहासनादित्यर्थः उत्थाय उपावसर्पन् उपावसीदन् गुरूपसदनप्रकारेणाचार्यसमीपं प्राप्य उवाचोक्तवान् । किमुवाच तत्राह—

(नमस्तेस्तु इत्यादि) हे याज्ञवल्क्य विद्यागुरो ते तुभ्यं नमोस्तु नमस्करोमि भवन्तम् । अनु मा मां शाधीति, शिष्योहं तेऽतो मामुपदिश उपसन्नाय शिष्यायावश्यमेवोपदेष्टव्यं तत्र विलम्बोऽन्यथावा न करणीय इति भावः । एवं शिष्यप्रार्थनानन्तरं याज्ञवल्क्यः प्राह—

(स होवाचेत्यादि) स ह याज्ञवल्क्यः प्रोवाच । हे सम्राट् जनक, यथा येन प्रकारेण लोकः महान्तमतिदूरमध्वानं मार्गम् एष्यन् गमिष्यन् । भूमिसम्बन्धिनं समुद्रसम्बन्धिनं वा मार्गं गन्तुमिच्छन् गमनसाधनम् रथं वा नावं नौकां वा समाददीत भौमं मार्गमतिक्रमितुं रथादिसाधनमात्मसात्करोति सामुद्रं वा मार्गमतिक्रमयितुं नौकादिसाधनमात्मसात् करोति । एवं तथैव परलोकगमनाय त्वमपि एताभिराचार्योपदिष्टोपनिषद्भिः समाहितात्मासि सम्पन्नपरलोकसाधनोसि परलोकगमनसाधनेनात्मार्थः प्रतिपादयति तेन यद्यपि त्वं युक्तोसि तथापि ते प्रकारं पृच्छामि

ऽस्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ व तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥१॥

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एतमिन्धं

यदि जानासि तदावदनो चेत् तदा कथयिष्यामीति । एवं वृन्दारकः राजत्वेन पूज्यमान आढ्यो धनादिनायुक्तः अधीतवेदः स्वाध्यायाध्ययनयुक्तो गुरुभिरुक्तोपनिषत्कश्चाप्यसि । सर्वंपुरुषार्थसम्पत्तिमानसि । एतादृशोभवान् । इतोऽस्मात् संसारप्रयोजकात् शरीरात् देहेन्द्रियादिसमुदायात् विमुच्यमानः पृथग्भवन् क्व गमिष्यसि । कं मार्गविशेषमासाद्य परलोकं गन्तासीति प्रश्नः ।

(नाहमित्यादि) हे भगवन् तत् अध्वानमहं न वेद । येन पथा उत्क्रामत् ब्रह्मवित् याति तमध्वानं न जानामि । यत्र येन पथा गमिष्यामि । ततो याज्ञवल्क्यः प्राह—

(अथ वै ते इत्यादि) हे जनक यत्र येन मार्गेण त्वमन्यो वा ब्रह्मविदुत्क्रामन् त्वं गमिष्यसि तत्पन्थानं तेऽहं वक्ष्यामि कथयामि । ततो जनकः प्राह भगवान् तन्मे ब्रवीतु कथयतु यदि मामनुग्रहीतुमिच्छसि चेदिति । यथोपकोशलविद्याप्रकरणे मात्रगतिप्रश्नोपिगन्तव्यब्रह्मणो विज्ञापकस्तद्वत् प्रकृतप्रकरणेपि प्रश्नोधिकस्य संग्राहकः अतो द्वयोरपि उत्तरप्रतिवचनमुपपन्नं भवतीति ॥१॥

(इन्धो हेत्यादि) यः खलु अयं परिदृश्यमानो दक्षिणेऽक्षन् दक्षिणे अक्षिणि दक्षिणनेत्रे इत्यर्थः यः पुरुषः पुरुषाकारः स एष इन्धो ह वै नाम, इन्धनामकः पुरुषः स च दक्षिणनेत्रे व्यवस्थित इति । तमेतमिन्धम् इन्द्रेतिनाम्ना आचक्षते । प्रत्यक्षन्तु तस्य नाम इन्ध इति किन्तु इन्धेति संज्ञां परित्यज्य

सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ।।२।।

अथैतद्वामेऽक्षिणि पुरुषरूपमेषास्य पत्नी विराट् तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयो-

परोक्षत इन्द्रेतिनाम्ना व्यपदिष्टो भवति । प्रत्यक्षत इन्धनाम्ना व्यपदेशमकृत्वा परोक्षेणेन्द्रनाम्ना व्यपदेशे किं कारणं तत्राह

(परोक्षप्रिया इत्यादि) हि यस्मात् कारणात् देवाः परोक्षप्रिया इव भवन्ति । न केवलं परोक्षप्रिया एव प्रत्युत प्रत्यक्षद्विषोपि भवन्ति देवाः प्रायो गोपनीयादिकमर्थजातं पर्यायशब्देनैव वदन्ति न तु स्पष्टरूपेण कथयन्ति । प्रत्यक्षेण कथने द्वेषं कुर्वन्ति पर्यायतः कथनेन प्रीतिमन्तो भवन्ति । यथा इदानींतना अपि बहवः स्वं महान्तं मन्यमानाः प्रत्यक्षनामग्रहणेन व्यपदेशं कुर्वाणं द्विषन्ति परोक्षनामग्रहणपूर्वकव्यवहारं कुर्वन्तं प्रति समादरयुक्ता भवन्ति । तस्मादेनमेवेन्धमिन्द्र इति नाम्ना व्यपदेशो भवति । "य एष एतस्मिन्मण्डले पुरुष" इति श्रुतौ यः स एव "यो यं दक्षिणेऽक्षन् पुरुष इति श्रुतावपीति उभयोरैक्यम् आदित्यमंडलस्थस्य पुण्डरीकाक्षत्वादिधर्मश्रवणेनेन्द्रत्वं व्यवस्थितम् । तथा "परमे-व्योमन्" "इन्द्रो मायाभिः" इत्यादि श्रुतिषु परमपुरुषस्य साकेताधिपतेरेवेन्द्रशब्दवाच्यत्वं प्रसिद्धमिति । अत्रापि दक्षिणनेत्रगतः पुरुषो भगवान् साकेताधिपतिरेवेति ।।२।।

(अथैतद्वाम इत्यादि) अथास्येन्धपर्यायेन्द्रस्य एषा पत्नी या वामेऽक्षणि वामनेत्रे पुरुषरूपं पुरुषाकारं अवस्थितम् । वामनेत्रे पुरुषाकाराविद्यमाना या एषैवेन्द्रस्य भोग्यत्वात् पत्नी साक्षात् लक्ष्मीः सीतैव । सा

रेषा सृतिः सञ्चरणीयैषा हृदयादूर्द्ध्वा नाड्युच्चरति यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता

विराट् बृहती श्रीः । इन्द्रपत्न्याः श्रीशब्दवाच्यत्वात् । तयोरेव दम्पत्यो र्वामनेत्रेस्थदक्षिणनेत्रस्थयोः एष संस्तावो वक्ष्यमाणैकान्तसंभोगस्थानम् । य एषोऽन्तर्हृदये हृदयकमलमध्ये आकाशः स एवेति । अथैनयोरिन्द्रेन्द्राण्यो रुभयोरेतत् अन्नम् अदनीयम् भोग्य महाप्रसादादिवत् । किं तत् अन्नमदनीयमत्र तत्राह य एषोऽन्तर्हृदये हृदयमध्ये लोहितपिंडः कमलकुड्मलाकारो मांसखण्डः किं चाथैनयोरेत्र दम्पत्योः शयनं कुर्वतोरेतत् प्रावरणम् उत्तमवस्त्रम् कितत्तत्राह यदेतत् अन्तर्हृदये हृदयमध्ये जालकमिव दृश्यते लूनाजालसदृशं वक्ष्यमाणहितानामकनाडीसमुदायसम्पन्नं जालकं तदेव दम्पत्योरुत्तमं कौशेयवस्त्रमिति । अथैनयोरिन्द्रेन्द्राण्योर्दम्पत्योरेषा वक्ष्यमाणा या नाडी । सा एतयोः संसृतिः मार्गः संचरणी । येन मार्गेण तौ दम्पती गच्छतो ब्रह्मलोकपर्यन्तम् । साकानाया ब्रह्मलोकपर्यन्तं गमयति तत्राह—

(या हृदये इत्यादि) या नाडी हृदयात् हृदयप्रदेशात् ऊर्ध्वाः ऊर्ध्वभागावस्थितोर्ध्वमुखेत्यर्थः व्युच्चरति विशेषत उच्चरति । सा नाडी दम्पत्योः संचरणी ब्रह्मलोकगमनकारणीभूता सृतिर्मार्गः एतामेवनाडीमवलम्ब्य ब्रह्मप्राप्तये उत्क्रामति ब्रह्मविदित्यर्थः । सा नाडी अतिसूक्ष्मेति दृष्टान्तद्वारेण दर्शयलि ।

(यथा केशा इत्यादि) यथा केशः सूक्ष्मः सहस्रधाभिन्नोतिसूक्ष्मोभवति । केशस्तु स्वयमेव सूक्ष्मः परन्तु यदि सहस्रभागः क्रियते तदा अतिशयेन सूक्ष्मो भवति यत्नतोपि उपलब्धये न भवति, एवमेव तथैव हिता नाड्यः अस्य देहस्य सम्बन्धिन्यः अन्तर्हृदये हृदयाभ्यन्तमंसिखण्डे प्रतिष्ठिताः स्थिता भवन्ति । एताभिरेव नाडीभिर्जीव एतत्भूतजातमास्र-

भवन्त्येताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः ॥३॥

तस्य प्राची दिक् प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्द्ध्वाः

वति संसरति । हृदयमध्यप्रतिष्ठितकेशसहस्रभागोपमितातिसूक्ष्महितानामक-नाडीभिर्द्वारैरेणैतज्जीवजातमास्रवतीति भावः

(तस्मादेष इत्यादि) यस्मात्कारणात् एषो दक्षिणनेत्रावस्थितः पुरुषः शरीरगुणादिद्वारेण दीप्यमानत्वात् इन्ध इन्द्रो भवति । तस्मादस्मात् शरीरभूतात् जीवात्मनो दाक्षेणनेत्रस्थित एष पुरुषः प्रविविक्ताहारतर इव-भवति अतिप्रकृष्टान्नवत्, तद्भोग्यो भवतीत्यर्थः । मंत्रेस्मिन् सृतिः संचरणीति कथनेन ब्रह्मलोकगमनमार्गः कथितो भवतीति ॥३॥

दक्षिणनेत्रावस्थितस्य प्रकृतस्य परमेश्वरस्य शरीरवर्ति जीवापेक्षया-वैलक्षण्यम् प्रकारान्तरेणापि दर्शयितुमाह—

(तस्य प्राची दिगित्यादि) तस्य प्राचीदिक् पूर्वा दिगेव प्राञ्चः पूर्व-दिगवस्थिताः प्राणाः एवं दक्षिणादिष्वपि अयं जीवः सर्वयां दिशि प्राणेन्द्रियबहुलतया प्राणेन्द्रियाद्युपकरवानिति । एव प्रकारेण जीवस्य स्वरूपं प्रदर्श्य परमेश्वरस्य जीववैलक्षण्यं दर्शयति ।

(स एष नेतीत्यादि) स एष दक्षिणनेत्रेऽवस्थितः परमेश्वरः पुरुषः नेति नेतिपदबोध्य इतरविलक्षणः रूपादिरहितत्वेनागृह्यः चक्षुरादिना न गृह्यते गृहीतो न भवति अशीर्यो निरवयवत्वात् न शीर्यते विकीर्णो-न भवति । असंगः कुत्रचित् केनचित् सक्तो न भवति । असितो न व्यथते शस्त्रादिना व्यथां न प्राप्नोति न रिष्यति हिंसितो न भवति । इत्थमि-

दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्य्यो नहि शीर्य्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहोऽभयन्त्वागच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमस्मी ३ इति ।।४।।

इति बृहदारण्यकोपनिषद चतुर्थाध्यायस्य द्वितीयं ब्राह्मणम् ।।२।।

तरविलक्षणत्वेन व्यवस्थित आत्मस्वरूपः। हे जनक ! अभयं भयरहितं परमेश्वरं प्राप्तोसि प्राप्तवानसि मत्तो ज्ञातवानसि। अत एतादृशं परमेश्वरमुपास्व तदुपासनं कुरु। एवं प्रकारेण याज्ञवल्क्यं प्रोक्तवानिति। एवं याज्ञवल्क्यप्रतिबोधितो वैदेहो जनक उवाच हे याज्ञवल्क्य ! अभयं त्वदुक्तमभयम् आगच्छतात्। मे ब्रह्मप्राप्तिर्भूयात्। यो यस्त्वं भगवन् पूजार्हं नोऽस्मभ्यम् अभयमभयस्वभावकं ब्रह्म वेदयसे लम्भयसे। महच्च ब्रह्मप्रापकाय भवते नमोऽस्तु नमस्कारो भवतु इमे विदेहा विदेहदेशाः तुभ्यं दक्षिणारूपेण समर्पिताः अयमहं विदेहदेशाधिपो जनकस्तवदासोहमस्मि तव दासभावमागतः। अतो यथेष्टं मां च राज्यं च प्रतिपद्यस्व। जनकस्याभयप्राप्त्यनन्तरं महानानन्दो जात इति तुष्टः स याज्ञवल्क्याय राज्यमात्मानं च दक्षिणारूपेण दत्तवानिति भावः ।।४।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये चतुर्थाध्यायस्य
द्वितीयं ब्राह्मणं समाप्तम् ।।४।।२।।

सामान्यतो ज्ञातमात्मानं स्वप्नादिद्वारेण विशेषतोऽधिगमाय तृतीयं ब्राह्मणमारभमाणः विद्यास्तुतये जनकयाज्ञवल्क्यसम्वादं दर्शयितुमुपक्रमते।

जनकं ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे स मुदा ते तस्मै ह याज्ञवल्क्य वरं ददौ स ह कामप्रश्नमेव वव्रे तं हास्मै ददौ तं सम्राडेव पूर्व्वं पप्रच्छ ॥१॥

(जनकं ह वैदेहमित्यादि) कस्मिंश्चित् समये याज्ञवल्क्यो मुनिः 'योगक्षेमार्थमीश्वरसमीपं गच्छेदि तिस्मृतिं स्मरन् जनकं वैदेहं प्रति जगाम गतवान् । राजसमीपे गमनेन मे योगक्षेमपालनं स्यादिति विचार्य्य जनकसमीपं गतवान् कदाचिद् याज्ञवल्क्य इति भावः । स याज्ञवल्क्यो गच्छन् मार्गे एवं मेने विचारितवान् यदहं राजानमध्यात्मविषये न वदिष्ये न किमपि वक्ष्यामि । एकदाहं गतवान् राजसमीपे तदा तत्र ब्राह्मणैः सह संवादे शाकल्यस्य शिरश्छिन्नमतोहमिदानीमध्यात्मविषये न किमप्युपदेक्ष्यामि केवलं योगक्षेमप्रश्नमेव निराकरिष्यामीति । एवं यथोक्तक्रमेण मनसा कृतसंकल्पोपि मुनिर्जनकेन यत् यत् पृष्टं तत्सर्वमुत्तरितवानित्याख्यायिकामाचष्टे ।

(अथ हेत्यादि) अथ जनकसमीपगमनानन्तरं जनकेनार्घ्यादिना पूजितो याज्ञवल्क्यः जनकश्च राजा वैदेहो अग्निहोत्रे अग्निहोत्रहोमविषये समूदाते परस्परं संवादं प्रश्नोत्तरलक्षणं कृतवन्ताविति । तस्मै जनकाय याज्ञवल्क्यो मुनिर्वरं ददौ । कर्मविषयकं जनकस्य ज्ञानवैशद्यं दृष्ट्वा न वदिष्ये इत्येवं कृतनिश्चयोपि मुनिः स्वकीयं निश्चयं विस्मरन्निव तस्मै वरं दत्तवानिति भावः । मुनिं प्रसन्नमुपलक्ष्य स ह जनकः कामप्रश्नमेवापेक्षितांशप्रश्नमेव वरं वव्रे कृतवान्स्वकीयप्रश्नविषयकमेव वरं प्रार्थयामासेत्यर्थः । तं च वरं ह अस्मै जनकाय याज्ञवल्क्यो ददौ तत्प्रार्थनां स्वीकृतवानित्यर्थः । तं याज्ञवल्क्यं तूष्णींस्थितं पूर्वं सम्राट् राजैव पप्रच्छ । वरप्रदानसामर्थ्यादनाचिख्यासुमपि याज्ञवल्क्यं तूष्णीं स्थितमपि पूर्वं वैदेह एव प्रश्नं कृतवानिति भाव ॥१॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति आदित्यज्योतिः सम्राडिति होवाचाऽऽदित्येनैव ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते

हे याज्ञवल्क्येत्येवं क्रमेण संबोध्य जनक उवाच किं ज्योतिरयं पुरुष इति अस्य पुरुषस्य ज्योतिः प्रकाशे येन ज्योतिषा व्यवहारो भवति। सोथं किं ज्योतिरिति पृच्छति। अयं पुरुषः स्वावयवसमुदाव्ययतिरिक्तेन ज्योतिषा व्यवहरति अथवा स्वावयवसमुदायमध्यवर्तिनैव ज्योतिषा ज्योतिः-कार्यं सम्पादयतीत्यभिप्रायेण पृच्छति किं ज्योतिरयं पुरुष इति। अस्य पुरुषस्य शयनगमनादिकं सर्वकर्मसाधनं ज्योतिः किमिति प्रश्नार्थ इति भावः। एव जनकप्रश्नं श्रुत्वोत्तरयति।

(आदित्येत्यादि) हे सम्राट् जनक अयं पुरुष आदित्यज्योतिः। आदित्यो ज्योतिः कर्मसाधनं यस्य स आदित्यज्योतिरिति। यं प्रकाशविशेषमादायैव प्राणिनां शयनासनगमनागमनविहारादि सर्वं कर्म संपद्यते यदभावे च कर्मलोप इव भवति, तादृशं ज्योतिः किमिति भावः। एतदेव श्रुतिः स्वयमेव दर्शयति।

(आदित्येनैवेत्यादि) आदित्येन ज्योतिषा आदित्यात्मकप्रकाशविशेषमादायैवास्ते आसनादिक्रियां सम्पादयति। पल्येति। पर्येति। अत्र परिउपसर्गघटकरेफस्य वैयाकरणनियमात् लादेशः ततश्च पर्येति इतस्ततो गमनादिकां क्रियां सम्पादयति कर्म कुरुते लौकिकं वैदिकमग्निहोत्रादिकं सर्वं कर्म सम्पादयति। विपल्येति विपर्येति। प्रतिनिवृत्यागमनादिकर्म संपादयति। सूर्योदयात् प्राक् सर्वोपि प्राणिवर्गीभूत इव शयानो भवति जाते च सूर्योदये तत्प्रकाशप्रकाशितभूम्यादौ सर्वेषां सर्वव्यवहारो गमनागमनादिको नाबाधतया भवति। दृश्यते चेदानीमपि संजायमानसूर्यप्रकाशे ब्राह्मणाः स्नानादिकर्म कुर्वाणाः पथिकाः गमनादिक

विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥२॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषाऽऽस्ते

कुर्वाणाः किं बहुना प्रत्यूषे एव पक्षिणोपि स्वकीयनिनदनशब्दैः प्रकृतिं मनोरमां, कुर्वन्तो भवन्ति । अत एत सुवति कर्मणि लोकं प्रवर्तयतीति सूर्यपदव्युत्पत्तिरपि संगता भवति । तस्मात् हे सम्राट् आदित्य एव ज्योतिः सर्वेषां प्रकाशलक्षणस्तादृशप्रकाशमादायैव सर्वेषां सर्वो व्यवहारो भवतीत्यत आदित्य ज्योतिरयं पुरुष इति । ततो जनको याज्ञवल्वयोक्तं सर्वमंगीकृत्य पुनरपि प्रश्नानन्तरं पृच्छति ।

(एवमेवैतदित्यादि) हे याज्ञवल्क्य ! यद्भवता कथितं तदेवमेव सर्वं सर्वथा सत्यमेव । एतत्पुनः पृच्छामि इति ॥२॥

प्रश्नमेव दर्शयति

(अस्तमिते आदित्ये इत्यादि) हे याज्ञवल्क्य ! आदित्ये सूर्ये जगत्प्रकाशके अस्तमितेऽस्तं गते सति किं ज्योतिरयं पुरुष इति । नहि सर्वव्यवहार आदित्ये प्रकाशाधीन एव भवति आदित्यास्तमयानन्तरमपि शयनासनादिव्यवहारस्य दर्शनात् । तथा च रात्रावपि व्यवहारस्य दर्शनात् किं ज्योतिः पुरुषः अन्वयव्यतिरेकाभ्यां हि कारणत्वस्य निर्णयः । प्रकृते तु अन्वयमात्रमेवोपलभ्यते, न तु व्यतिरेकः सवितुः प्रकाशाभावेऽपि शयनादिकार्यदर्शनात् । तत्कथं विनिर्णीतमादित्यज्योतिरयं पुरुष इति प्रश्नः?

उत्तरयति (चन्द्रमा इत्यादि) हे जनक चन्द्रमा एवास्य पुरुषस्य ज्योतिर्भवति चन्द्रमसैवायं पुरुषः आसनादि कार्यं करोति इतस्ततो याति लौकिकं वैदिकं कर्म करोति विपर्येति प्रत्यागतोभवति । तस्मादादित्यस्यास्तमयानन्तरं चन्द्रप्रकाशेन कार्यदर्शनात् चन्द्रमा एव तदा ज्योतिर्भवतीति

पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ।।३।।

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवाऽयं ज्योतिषाऽऽस्ते पल्ययते कर्म्म कुरुते विपल्येतीत्येवमेवतद्याज्ञलक्य ।।४।।

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं

श्रुत्वा जनकः प्राह हे याज्ञवल्क्य एवमेवैतदिति ।।३।।

पुनरपि जनकः पृच्छति हे याज्ञवल्क्य ! आदित्ये सूर्येऽस्तमितेऽस्तं गते सति चन्द्रे चास्तमिते तस्याप्यस्तमयानन्तरं किंज्योतिरयं पुरुषः । उभयोः सूर्यचन्द्रमसोरस्तमयानन्तरं कं ज्योतिर्विशेषमादाय प्राणिनां व्यवहारो भवति । व्यवहारस्य प्रकाशजन्यत्वात् प्रकाशकत्वेनाभिमतयोः सूर्यचन्द्रमसोरभावात् कथं लोकानां व्यवहार इति प्रश्नः ? उत्तरयति—

(अग्निरेवास्य ज्योतिर्भबतीत्यादि) हे जनक ! यदा सूर्यचन्द्रमसोरभावो भवति तदा यः कोपि व्यवहारो भवति चेतनवर्गस्य स सर्वोऽपि लोकव्यवहारोऽग्निज्योतिर्निमित्तक इति भवति सर्वत्राग्निप्रकाशाधीन एव भवति । एतच्छ्रुत्वा जनकः स्वीकारवचनमाह एवमेतद्याज्ञवल्क्येति ।४।

पुनरपि जनकः प्राह हे याज्ञवल्क्य ! यदा सूर्योऽस्तमितो भवति भवति चास्तमितश्चन्द्रोऽग्निश्च शान्तो भवति तदा योयं चेतनवर्गस्य सर्वव्यवहारो जायमानोनुभूयते स किन्निमित्तको भवति । न हि कारणमन्तरेण कार्यं भवति । इह च कारणत्वेनाभिमतसूर्यचन्द्राग्नीनामभावात् चेतनवर्गस्य जायमानो व्यवहारोन्यथानुपपद्यमानः कमपि कारणमाक्षिपतीति आक्षिप्यमाणं कारणं किमिति प्रश्नः याज्ञवल्क्य उत्तरयति ।

(वागेवास्य ज्योतिर्भवति) अयं भावः सूर्यादिवह्निपर्यन्तव्यव-

ज्योतिषाऽऽस्ते पल्ययते कर्म्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येव-मेवैतद्याज्ञवल्क्य ॥५॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भव-

हारजनककारणानामभावेपि जायमानो व्यवहारो वाग् निमित्तक एव। वाचः साहाय्यमादाय सर्वव्यवहारो भवतीति ननु यथा सूर्यादीनां ज्योतिः स्वभावत्वं न तथा वाचस्तथात्वमनुभवसिद्धमिति वाचोपि तथात्वं दर्श-यन्तीश्रुतिराह

(तस्माद्वै इत्यादि) हे सम्राट् यस्मात वाचो ज्योतिरूपत्वं तस्मात्कारणात् यत्र यस्यां रात्रौ भाद्रमासीयायां मेघादिना अन्धकरान्त-रितायां स्वः पाणिरात्मीयोपि हस्ताद्यवयवः सम्बद्धोपि न विनिर्ज्ञायते नाव-गतो भवति तत्कालेऽथ यत्र यस्मिन् देशेन्धकाराऽन्धकारिते देवदत्तादेः पुरुष-स्यात्रामुकस्थानेऽहमस्मीत्याकारकः शब्दो निर्गच्छति तदा तत्रासौ वर्तते इति ज्ञात्वा श्रोता उपैव तत्र न्येति उप तत्समीपे निनितरामेति गच्छति तत्र शब्दद्वारा श्रोत्रं प्रकाशकं भवति। अयं भावः यत्र यदा सूर्यादिः प्रका-शको नास्ति भाद्रमासीयान्धकारपरिवृतायाममायामपि शब्दद्वारा आगमन-गमनादिव्यवहारोऽबाधित इव भवतीति। वाचः प्रकाशात्मकत्वं भवत्येवेति याज्ञवल्क्यवचनमाकर्ण्य युक्त्योपजानन् अनुमोदयंश्च तद्वचनमाह।

(एवमेतद्याज्ञवल्क्येतीति) ॥५॥

पुनरपि जनकः प्राह

(अस्तमिते आदित्ये याज्ञवल्क्येत्यादि) हे याज्ञवल्क्य आदित्येऽ-स्तमिते अस्तमिते चन्द्रमसि शान्तेऽग्नौ शान्तप्रायायां वाचि, स्वप्नावस्था-यामित्यर्थः तदा अयं पुरुषः किंज्योतिर्भवति। स्वप्नावस्थायां बाह्या-लोकस्य बाह्येन्द्रियाणां चोपरमात् तस्मिन्समये यो व्यवहारः स

तीत्यात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म्म कुरुते विपल्येतीति ॥६॥

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः

किं ज्योतिर्विशेषमादाय भवतीति प्रश्नः ? उत्तरयति ।

(आत्मैवास्य ज्योतिर्भवतीत्यादि) हे जनक तत्समये योऽयं पुरुषस्य व्यवहारः स आत्मलक्षणप्रकाशेनैव भवति । यतः तदा आदित्यादिप्रकाशकस्याभावात् परिशेषादात्मैव स्थितिगमनादिकारणीभूतः प्रकाशको भवति तस्मात् स्वप्नादिकाले जायमानव्यवहार आत्मप्रकाशाधीन एवेति सिद्धम् ॥६॥

आत्मैवास्य ज्योतिर्भवतीत्यत्रात्मशब्देन ज्योतिः शब्देन च प्रकाश्यमानपुरुषस्वरूपं किमाकारकमिति पुनः प्रश्नयति जनकः ।

(कतम आत्मेतीति) हे याज्ञवल्क्य ! अस्मिन् परिदृश्यमानकार्यकरणसमुदाये आत्मा कः ? यो हि प्रकाशको भवतीति प्रश्नः ? उत्तरयति ।

(योयं विज्ञानमय इत्यादि) प्राणेषु प्राणशब्दबोध्येन्द्रियवर्गेषु मध्ये योयं विज्ञानमयो विज्ञानप्रचुरो ज्ञानधर्मकः पुरुषो हृदि वर्तमान ज्योतिः स आत्मा हृदयकमलमध्यगतः प्राणपदवाच्येन्द्रियसहचरो ज्ञानगुणकः स आत्मेत्यर्थः । विज्ञानमय इत्यत्र मयट्प्रत्ययो न विकारार्थकोऽपि तु प्राचुर्यार्थकः यवमयो यज्ञ इतिवत् । एतावता यो यत्प्रचुरः स तद्भिन्नो यथा यवप्रचुरो यज्ञो यवभिन्नस्तद्वत् विज्ञानप्रचुरत्वादात्मा विज्ञानव्यतिरिक्तः । एव प्राणेषु इत्यत्र सप्तमीविभक्तिनिर्देशात् इन्द्रियव्यतिरेकोप्यात्मनः सिद्ध्यति । एवं यथा प्रभाद्वारा जगदवभासकः सविता ज्योतिरिति कथ्यते तथा ज्ञानात्मकप्रकाशद्वारा सर्वावभासक आत्मा विज्ञानगुणकज्योतिरिति कथ्यते ।

पुरुषः स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव स हि स्वप्नोभूत्वेमं लोकमतिक्रामति मृत्योरूपाणि ।।७।।

स वाऽयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः

(स समान इत्यादि) स जीवात्मा यद्यपि परमेश्वराधीनकर्तृत्वः तथापि "अहंकारविमूढात्मा कर्ताहमिति मन्यते" इति भगवदुक्तरीत्या समानः सन् स्वातन्त्र्याभिमानमोहितः सन् ध्यायतीव चिन्तयतीव लेलायतीव स्वतन्त्रः कर्ता इव । उभौ लोकावनुसञ्चरति लोकद्वयेपि सञ्चरणं करोति । लेलायति चरतीवेति कथनेन जीवे यत् कर्तृत्वमाभाति तत् परमेश्वराधीनमौपाधिकं चेति ज्ञातव्यम् । न च ध्यायतीवेत्यत्रेवशब्दप्रयोगात् जीवस्य कर्तृत्वं सर्वथैव नास्तीति वाच्यम्, कर्त्ता शास्त्रार्थवत्वादिति व्याससूत्रे सांख्यतंत्रसिद्धकर्तृत्वं निराकृत्य कर्तृत्वस्येतरवादिभिः सर्वैरेव स्वीकृतत्वात् । तच्च कर्तृत्वं सर्वशक्तिमतः परमेश्वरस्य जीवस्य तु तदधीनं कर्तृत्वमितिस्थितमिति ।

(स हि स्वप्न इत्यादि) स परायत्तकर्तृत्वो जीवः स्वप्नः स्वप्नावस्थो भूत्वा स्वप्नावस्थायां यादृशविशिष्टोऽभवत् तादृशदेहातिरिक्त गोव्याघ्रादिशरीरगतो भूत्वा । इयं परिदृश्यमानं लोकं जाग्रत्प्रपञ्चात्मकं तथामृत्योर्दुःखप्रदस्य संसारस्य रूपाणि दुःखात्मकानि एतादृशानि मनुष्यादिशरीराणि अतिक्रामति स्वप्नावस्थायां दुःखजनकानि मनुष्यादिशरीराणि न पश्यतीत्यर्थः । एवञ्च स्वप्नावस्थायां जाग्रत्कालिकशरीरादर्शनात् शरीरान्तरपरिग्रहदर्शनाच्च शरीरभिन्नत्वमन्वयव्यतिरेकाभ्यां जीवात्मनः प्रदर्शितं भवतीति भावः ।।७।।

शरीरेन्द्रियप्राणमनो बुद्धिभिन्नस्य जीवात्मनो योऽयं पापादिसम्बन्धः सन् स्वाभविकोऽपि तूपाधिनिबन्धन एवेति दर्शयितुं श्रुतिराह

(स वा अयं पुरुष इत्यादि) स वायं पुरुषः खल्वयं जीवो जायमानः

संसृज्यते स उत्क्रामन् म्रियमाणः पाप्मनो विजहाति ।।८।।

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदञ्च परलोक-

उत्पद्यमानः ननु नित्योयं जीवस्तत्कथमेतस्योत्पत्तिः स्यात् न हि नित्यस्य गगनादेरुत्पत्तिर्दृश्यते श्रूयते उपपद्यते तदेव नित्यस्य नित्यत्वं यत् प्रागभाव-प्रध्वंसाप्रतियोगित्वं जन्यत्वे तन्नस्यादतो जायमान इत्यर्थं स्वयमेव श्रुतिराह शरीरमभिसम्पद्यमानः नवनरशरीरसम्बन्धं भजमानः ततश्च शरीरसम्बन्ध एवास्य जीवस्य जननं न तु वस्तुत उत्पत्तिर्जीवनम् मुख्ये बाधकस्य सद्भावात् । मुख्ये बाधकसत्त्वे गौणीवृत्तेः स्वीकारात् तदिह मुख्यार्थबाधात् गौणीवृत्तेरा-श्रयणेन गौणार्थ एव परिगृहीत इति । शरीरसम्बन्धादनन्तरमेव स जीवः पाप्मभिः पापात्मककर्मणा सम्बद्धो भवति एवं च शरीरसम्बन्धोपाधिक-एवास्य पापादिसम्बन्धो न तु स्वाभाविकः पापसम्बन्धः । स जीव उत्क्रामन् शरीरसम्बन्धं परित्यजन् म्रियमाणो मरणव्यवहारं भजन् पाप्मनः पापसम्ब-न्धं विजहाति परित्यजति । यद्यपि नित्यस्य मरणं न सम्भवति । अतः श्रुति-रुत्क्रामन्निति कथितम् । अत्र चोत्क्रमणमात्यान्तिकोत्क्रमणमेव विवक्षितम् । शरीरसम्बन्धाभावाय पापं परित्यज्यति सर्वपापविधूननस्यान्यत्र श्रवणात् । यत्सत्वे यत्सत्वं यदभावे च यदभाव इत्यन्वयव्यतिरेकाभ्यां शरीरसम्बन्ध-मूलक एव पापसम्बन्धो जीवस्येति नतु स्वाभाविक इति ।।८।।

अथ स्वप्नो भूत्वेमंलोकमतिक्रामति इत्यादिना जीवस्य शरीरव्यति-रेकसमर्थनं न युक्तमिवाभाति, यतः इहलोकपरलोकयोरेव देहपरिग्रहस्थान-त्वात् स्वप्नस्य च शरीरपरिग्रहस्थानत्वाभावादित्याशंकामपाकर्तुं श्रुतिराह

(तस्य वा एतस्य पुरुषस्येत्यादि) तस्य वा एतस्य शरीरसम्बन्ध-युक्तस्य पुरुषस्य द्वे द्वित्वसंख्याविशिष्टे स्थाने भवतः, इदं च परलोकस्था-नञ्च । अयञ्च परश्च लोक इत्येतत्स्थानद्वयमित्यर्थः । सन्ध्यं तृतीयं स्वप्न-

स्थानञ्च सन्ध्यं तृतीयं स्वप्नस्थानं तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदञ्च परलोकस्थानञ्च अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति

स्थानं जीवस्य भवतीति शेषः। सन्ध्यं नाम सन्धौ भवं जायमानम्। यदिदं स्वप्नरूप तृतीयं स्थानं स्वप्नलक्षणं जीवस्य तत्स्थानद्वयानुभवयोग्यत्वात् तृतीयं स्थानमिति कथ्यते। यतो जाग्रत जीव इममेव लोकं केवलम्पश्यति। स्वप्नावस्थस्तु जीवः कदाचित् इम लोकमपि पश्यति कदाचित् परलोकं स्वर्गनरकादिकं पश्यति। ततश्चेह लोकपरलोकस्थानदर्शनयोग्या ताभ्यां विलक्षणा काचिदियं तृतीया स्वपनावस्था भवति जीवस्येति। एतदेवार्थं व्यासरूपेणाह श्रुतिः।

(तस्मिन्संध्ये इत्यादि) तस्मिन्स्थानद्वयविलक्षणे सन्ध्ये सन्धौ भवे-स्थाने तिष्ठन् जीवः एते उभेपि स्थाने पश्यति तत्स्थानस्थितपदार्थान् साक्षात्करोति। किं तत्स्थानद्वयं यत् स्वप्नस्थः पश्यति तत्राह।

(इद च स्थानं परलोकस्थान चेति) ननु परिदृश्यमानदेहवियोगानन्तरमेव पुरुषः परलोकं स्वर्गनरकादिकं पश्यति तथा सति जीवन् एतद्देहे विद्यमानः स्वप्नावस्थः कथं पश्यतीत्याशंकां निवर्तयितुमाह (अथ यथाक्रमोयमित्यादि) आक्रामत्यनेनेति आक्रमः पुण्यपापलक्षणः तमाक्रममादायायं जीवः परलोकस्थाने भवति परलोकं प्राप्य सुखं दुःखमनुभवति। तमाक्रममाक्रम्य तादृशं पुण्यं पापं चादायोभयान् पाप्मनः आनन्दांश्च पश्यतिस्वप्ने। अयं भाव यादृशपुण्यपापलक्षणमाक्र विशिष्टोभूत्वाजीवः परलोके सुखदु खेऽनुभवति तथा तथैव पुण्यपापलक्षणमाक्रममादाय तत्प्रयुक्तस्तदनुकूलान सुखदुःखादीननुकूलान् प्रतिकूलान् स्वप्नावस्थायामपि पश्यति। एव च स्वप्नकाले परिदृश्यमानशरीरातिरिक्तशरीरेणोपभोगयोग्यं पुण्यपापप्राप्तं परलोकस्थानमेव। पुण्यवशात्स्वप्ने देवादिशरीरमासाद्य तदुचितान् भोगान्

स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं निहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति ॥९॥

भुनक्ति, पापबलात्तु दुःखमयशरीरमासाद्य तदुचितदुःखमनुभवतीति । भवति स्वप्नस्थानस्य परलोकवस्तुप्रापकत्वमिति । ननु यथा परलोके पुण्यपापादिबलेन पदार्थसृष्टिर्भवति तथैव यदि पुण्यपापबलेन स्वप्नेपि सृष्टिर्जायते इति मन्यते तदा स्वप्नसमये प्रकाशकेन्द्रियस्य मनसोनुपरमात् आत्मनः स्वयंज्योतिःस्वभावत्वं कथं सिद्धयेत् प्रकाशकस्येन्द्रियस्य तदापि सद्भावादित्याशंकायामाह श्रुतिः ।

(स यत्र प्रस्वपितीत्यादि) स जीवो यत्र यस्मिन्काले प्रस्वपिति स्वप्नावस्थायां अनुभवं करोति तदा सर्वावतः सर्वतो भोग्यभोगोपकरणादि-सर्वयुक्तस्यास्य परिदृश्यमानस्य लोकस्य प्रपञ्चस्य मात्राम् मीयते प्रज्ञाप्यते अनेनेति मात्रा प्रकाशकेन्द्रियसमुदायस्तमिन्द्रियवर्गम् उपादाय गृहीत्वा स्वयं निहत्य तमिन्द्रियवर्गं प्रकाशकत्वेनाभिमतं निहत्य निश्चेष्टतां व्यापार-रहितं कारयित्वा स्वयं स्वेनैव निर्माय निर्माणं कृत्वा । यद्यपि निर्माणका-र्तृत्वं भगवत एव तथापि अदृष्टद्वारा निर्माणकर्तृत्वं जीवस्येति तदुक्तमन्यत्र कर्मणाऽजनयत् पितेति । स्वेन भासा स्वेन ज्योतिषा स्वकीयप्रकाशरूपेण प्रस्वापिति निद्रातीत्यर्थः । अत्रास्यामवस्थायां पुरुषो जीवः स्वयं ज्योतिः स्वयं प्रकाशको भवति । यद्यपि स्वाप्निकपदार्थस्य भानमात्मधर्मभूतज्ञाने-नैवभवति न तु आत्मज्योतिषा तद्भानं, तथापि यथा आदित्यः प्रकाशद्वारा सर्वानवभासयन् स्वयं प्रकाशस्तथैवात्मापि स्वधर्मभूतज्ञानेनावभासयन् स्वयं प्रकाशइ ति कथितो भवतीति ॥९॥

ननु पूर्वमुपपादितं यत् आत्मज्योतिषाऽऽस्ते कर्म कुरुते तन्नोपपद्यते

न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान् मुदः प्रमुदः

आसनगमनादिक्रियायास्तदानीमभावात् । वस्तुतोऽभावे कस्यप्रकाशकत्व-मित्याशंक्याह ।

(न तत्र रथा न रथयोगा इत्यादि) तत्र स्वप्नकाले संवृतहृदयप्रदेशे रथागमनसाधनलक्षणाः शकटादयो न भवन्ति, नैव विद्यमानाः सन्ति, संवृतसूक्ष्महृदयप्रदेशे तत्सत्वासंभवात् । तथा रथयोगा अश्वादयो रथ-वाहका अश्वादयो न भवन्ति । तत्र युज्यन्ते रथनयनाय रथे संबध्यन्ते इति योगाः रथस्य शकटादेर्योगा रथयोगा अश्वबलीवर्दादिकाः एते रथयो गास्तदानीं न भवन्ति तथा पन्थानो मार्गा यत्र संचरन्तो रथा दृश्यन्ते तानि राजमार्गादीन्यपि न भवन्ति सूक्ष्मनाडीविषये तेषामसम्भवात् । अथ तथापि सर्वशक्तिसम्पन्नो वसुधापतिर्भगवान् रामोघटितघटनापटीयसीमायासहक-रिणासम्भाव्यमानानपि रथादीन् गमनादिसाधनभूतान् सृजते उत्पादयति रथयोगान् अश्वादींश्च सृजते पथस्तादृशरथादिगमनदेशान् अपि सृजते समु-त्पादयति । ततश्च भगवता समुत्पादितं रथादिकं स्वप्नावस्थः पुरुषः पश्यतीति नार्थाभावस्तदानीं शंकनीयः । तथा तत्र स्वापसमये आनन्दाः भवन्ति । तत्रानुकूलविषयदर्शननिबन्धना प्रीतिरेवानन्दः । तथा तदानीं मुदोपि न भवन्ति इदं मदीयमित्याकारकस्वकीयत्वबुद्धिजनिता प्रीतिरेव मुत् । तदभावस्तत्र । तथा प्रमुदोपि न भवन्ति तत्र विनियोगजनिता या प्रीतिः सैव प्रमुत् । यद्यपि इमे आनन्दादयास्तत्र न भवन्ति । अथ तथापि एतानानन्दादीन् स्वकीयशक्त्या भगवानेव सृजते समुत्पादयति । तथाच भगवन्निर्मितपदार्थजातमांतरं स्वप्नदृक् पश्यतीति । अन्तरानन्दा-दीनामुत्पत्तिप्रकारं दर्शयित्वा अतिवाह्य बाह्यपदार्थादीनामुत्पत्तिं स्वप्ना-वस्थायां दर्शयितुमाह ।

सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्ताः

(न तत्र वेशान्ता इत्यादि) तत्र स्वप्नावस्थायां वेशान्ताः पल्वलानि क्षुद्रामेध्यजलाशयानि पुष्करिण्यः प्रोत्फुल्लपंकजयुक्ता नद्यो न भवन्ति । तथा स्रवन्त्यो गिरिदुर्गादितः क्षरणशीला महानद्यो न भवन्ति । अथ तथापि सर्वशक्तिसम्पन्नः साकेताधिपतिस्तान् तान् सर्वानेव बाह्यार्थान् सृजते समुत्पादयति ।

ननु यद यत्र देशे स्वप्नदृक् पुरुषो रथादि पदार्थजातं पश्यति तस्मिन् समये तत्र वर्तमानोऽन्यो न पश्यति । यदि परमेश्वरकर्तृको रथादिर्भवेत् तदा अन्योपि पश्यति यथा जाग्रत्काले एको देवदत्तो घटादिकं यत्र पश्यति तदा तत्रैवान्यो यज्ञदत्तादिरपि तं पश्यति । दृश्यतेचैकस्मिन् नर्तकीभ्रूलताविक्षेपे बहूनां प्रतिसन्धानम् । एवं स्वप्नदृष्टपदार्थं स एव स्वप्नदृक् प्रबोधानन्तरं तस्मिन्देशे याति तदा स्वप्नदृष्टं रथादिकं न पश्यति । तादृशा रथादयोऽन्यत्र गता इति तेषां गमनचिह्नादिकं न जानाति, न वा ते पदार्था विनष्टा इति तेषां नाशचिह्नान्यपि नावगच्छति । अतः कथमेतादृशी स्वप्नसृष्टिरुपपद्यते परमेश्वरकर्तृकत्वे यदि सर्वदा सर्वत्र सर्वपुरुषेणोपलभ्येत नोपलभ्यते तस्मादिदं सर्वमसमंजसमित्याशंकामपनोदितुमाह–

(स हि कर्तेति) सकलप्रपञ्चस्योत्पादको हि भगवान् सर्वेश्वरः सर्वशक्तिमांश्च विचित्रप्राणिकर्मबलेन सर्वस्य जनकः स किं किं न कर्तुं समर्थः अघटमानामपि सृष्टिं सर्जयति न तत्र तर्कावसरः । तदुक्तम् "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति ।" एतादृशाभिप्रायविशेषं द्योतयितुमेव प्रकृते हि शब्दो नियोजित इति । अथ स हि कर्तेत्यत्र स यत्र प्रस्वपितीति वाक्येन प्रक्रान्तजीवस्यैव ग्रहणं कुतो न भवति अकस्मात् परमेश्वरस्य ग्रहणे प्रकरणविरोधादिति चेन्न । 'सन्ध्ये सृष्टिराह हि' इत्यधिकरणे स्वप्नसृष्टेर्जीवकर्तृकत्वं निराकृत्य परमेश्वरकर्तृकत्वस्यैव

तुष्करिण्यः स्रवन्त्यः सृजते स हि कर्त्ता ॥१०॥

...थापनात् । तथा हि "न तत्र रथा न रथयोगा" इत्यादिवाक्ये स्वप्ने जीवकर्तृकैव सृष्टिः प्रतिपाद्यते । तथा "एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण" इत्यादौ कामानां निर्मातारं जीवमेव दर्शयति । अत्र "कामना-विषयाः पुत्रादयः शतायुषः पुत्रपौत्रान् वृणीष्व" इत्यादौ तथा दर्शनात् । पुत्रादयः कामाः तस्मात् जीव एव प्रकृते कर्ता तत्कर्तृकैव स्वप्नसृष्टिरिति । न च जीवस्याल्पप्रज्ञस्य कथमेतादृशसृष्टौ कर्तृत्व स्यादिति वाच्यम् । प्रजापतिवाक्ये जीवस्यापि सत्यसंकल्पादेः कथनात् । न च जीवे वर्तमाना अपि ते गुणाः संसारदशायां तिरोहिता नातस्तमादाय कर्तृत्वं जीवस्य घटते इति वाच्यम् ? यथा मुक्तिदशायामेते सत्यसंकल्पादयो गुणाः प्रादुर्भवन्ति तथैव स्वप्नदशायामपि जीवे प्रादुर्भावसम्भवात् । तस्मात् जीवकर्तृकैव स्वप्नसृष्टिर्नतु परमेश्वरकर्तृका तथात्वे स्वप्नसृष्टेऽपि घटादिसृष्टिवत् स्थायित्वप्रसंगे न जागरितावस्थायां तद्वा संभवादिति पूर्वपक्षे प्राप्ते "मायामात्रं तु कात्स्र्न्येनानभिव्यक्तस्वरूपत्वा" दिति सूत्रेण समाधानस्य भगवता व्यासेन सम्पादनात् । तथाहि अत्र मायाशब्दः आश्चर्यरूपमर्थमादाय परमेश्वर-शक्तिसंकल्पवाचकः निघण्टुप्रभृतिकोशादौ मायाशब्दस्य परमेश्वरज्ञान-लक्षणसंकल्पवाचकत्वस्य दर्शनात् । ततो मायामात्रं परमेश्वरसंकल्प-मात्रसृष्टमिदं स्वाप्निकवस्तु न तु जीवसृष्टं यतः कत्स्र्न्येनानभि-व्यक्तस्वरूपत्वात् । प्रजापतिवाक्योदितसत्यसंकल्पत्वादिब्रह्मलक्षणस्यापि जीवस्यासंसारं सर्वात्मनाऽनभिव्यक्तस्वरूपत्वादेतादृशसृष्टिजनकत्वं न सम्भवति तस्मात् "स हि" कर्तेति वाक्ये सर्वसर्जकतया प्रसिद्धपरमेश्वर एव सन्ध्यसृष्टिकर्ता न तु तद्भिन्नो जीवोऽन्यो वा कश्चित्सर्जक इति । किञ्च यदि स्वप्नदृग् जीव एव कर्ता स्वप्नसृष्टेः स्यात् तदा स जीवः सर्वदा सर्वत्र हतप्रयोजनामेव सृष्टिं कुर्यात् सुखसम्पादनाय । न तु कदाचिदपि

आत्मनोऽहितां दुःखप्रयोजिकामेव सृष्टिं कुर्यात् । नहि कोपि सुस्थात्मा स्वानभिमतकार्यं कुर्वाण उपलभ्यते दृश्यते च स्वप्ने भयादिजनकव्याघ्रचौरश्मशानादिविविधदुःखजनकानेकप्रकारिकापि सृष्टिः । तस्मात् न जीवः स्वप्नसृष्टेः कर्ता । अपि च यदि जीवः स्वप्नसृष्टेः कर्ता स्यात् तदा स्वकृतकार्यस्यानुसन्धानमपि स्यात् । इमान् स्वाप्निकपदार्थानहमस्राक्षमित्याकारकानुसन्धान कस्यापि न भवति, तस्मात् स्वप्नसृष्टिर्न जीवकर्तृका अपि तु परमेश्वरकर्तृकैवेति निश्चीयते । एवं "कामं कामं पुरुषो निर्मिमाण" इत्यत्रापि तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते" इत्यादि प्रकरणपर्यालोचनेन ब्रह्मविषयत्वमेव काम कामभितिवाक्यस्य तस्मात् न जीवस्य कर्तृत्वं, किन्तु सर्वेश्वरस्य सर्वशक्तिमत एव कर्तृत्वम् । ननु जीवस्य यदि स्वाभाविका एव सत्यसंकल्पादयो गुणास्तदा ते कथमनभिव्यक्ता भवन्ति न हिं यस्य यः स्वाभाविकः स कदाप्यन्तभूतो भवति, जलशैत्यवदिति चेन्न परमात्मसंकल्पादेव जीवस्य स्वाभाविका अपि गुणा अनभिव्यक्ता भवन्तीति गृहाण परमेश्वरकृपयैव जीवानां बन्धमोक्षावपि भवतः "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति, "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति । एष एव हि आनन्दयति एष एव उ साधु कर्म कारयति य मूर्ध्वमुन्निनीषति एष एव उ असाधु कर्म कारयति त यमेभ्योऽधोनिनीषति" इत्यादि श्रुत्यन्तरात् । सोयं पूर्वोक्तगुणानां तिरोभावो जीवस्य सृष्टिसमये देहसम्बन्धाद् भवति । प्रलयसमये तु सूक्ष्माचित्शक्तिद्वारेण भवतीति । किं च स्वप्नं शुभाशुभसूचकमिति कथयन्ति स्वप्नाध्यायविदः "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने । स्वप्ने पुरुषं कृष्णं कृष्णादन्तं पश्यतीत्यादि" ततश्च यदीयं स्वप्नसृष्टिर्जीवकर्तृका भवेत् तदा जीवः शुभसूचकानेव सृष्ट्वा पश्येत् नाशुभसूचकान् कदाचिदपि सृजेत् पश्येद्वा । तस्मात् नेयं सृष्टिर्जीवकर्तृका

तदेते श्लोका भवन्ति ।

स्वप्नेन शारीरमभिप्रहत्या सुप्तः सुप्तानभिचाकशीति ।।

शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंसः ।।११।।

अपि तु परमेश्वरकर्तृकैव । अतः स हि कर्त्ता इत्यत्र तत्पदेन परमेश्वर एव सर्वसर्जकस्तत्पदेन गृह्यते इति सर्वमवदातम् ।

यदत्र परैराशङ्कितम् यदि परमेश्वरकर्तृकत्वेन स्वप्ने सृष्टेः सत्यत्व स्वीकारे रथाद्युत्पत्तिवदादित्यादेरप्युत्पत्तिस्वीकारे जाग्रत्काल इव स्वप्नकालेऽपि प्रकाशान्तरस्य विद्यमानत्वेनात्मनः स्वप्रकाशत्वस्य दुर्विज्ञेयत्वमापद्येत तस्मात्स्वाप्निकपदार्थानां सत्यत्वकथनं प्रकरणविरुद्धमिति तदसत् । तन्मते मनसः प्रकाशस्य स्वप्नसमये विद्यमानत्वेनात्मनः स्वप्रकाशत्वसाधनं सर्वथैवासमंजसमेव स्यात् । अतो लोकप्रसिद्धसूर्यादिज्योतिषोऽभावेपि स्वीयज्ञानेन भासकत्वात् स्वयं ज्योतिष्ट्वत्वं भवत्येवेतीत्यत्रैव श्रुतितात्पर्यमिति ।।१०।।

(तदेते श्लोका इत्यादि) तदत्र स्वप्ने स्वप्नदृक्विषये एते वक्ष्यमाणाः श्लोकाः प्रवृत्ता भवन्ति । तदेव श्लोकं दर्शयति—

(स्वप्नेन शारीरमित्यादि) स्वप्नेन स्वप्नेनोपलक्षितो जीवः शरीरं शरीरमेव शारीरं शरीरमित्यर्थः अभिप्रहत्य । शरीरं चेष्टारहितं कृत्वा असुप्तः स्वयमलुप्तप्रकाश एव सुप्तान् क्रियाविरहितान् प्राणान् अभिचाकशीति अभितः चाकशीति । अत्र कशधातुर्गत्यर्थकस्तेन सर्वतः स्वयं स पर्यटति इत्यर्थं इतस्ततः परिभ्रमतीति । शुक्रं ज्योतिष्मत् प्रकाशं मनः प्रभृतिकमिन्द्रियवर्गमुपादाय पुनरपि स्वप्नान्ते स्थानं स्वकीयस्थानमेति प्राप्नोति स हिरण्मयः प्रकाशात्मक एक हंसः स एकः सजातीयद्वितीयरहितः एव हंति गच्छति एतादृशः पुरुष इति ।।११।।

प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा ॥
स ईयतेऽमृतो यत्र कामं हिरण्मयः पुरुष एकहंसः ॥१२॥

(प्राणेन रक्षन्नित्यादि) अवरम् प्राणाद्यपेक्षया हीनं निकृष्टम् कुलायं कार्यकरणसंघातात्मकं शरीरम् कुलायम् पक्षिणामावासभूमिः कुलायं यथा कुलायात् प्रातः काले पक्षिणो निर्गत्यदिने इतस्ततो भ्रमण कृत्वा सायं समये पुनस्तत्रैव निवासभूमौ प्रत्यागच्छन्ति । एव जीवोऽपि स्वप्नकाले यत्र तत्र गत्वा यथा दृष्टं सुखदुःखप्रयोजकान् तत्तत्पदार्थान् दृष्ट्वा पुनः प्रबोध समये तस्मिन्नेव शरीरात्मककुलाये आविशति तस्मात्कुलायोपमितं शरीरं प्राणाद्यपेक्षया हीनसत्ताकं प्राणेन पंचवृत्यात्मकेन । प्राणेन रक्षन् शरीर-रक्षां कुर्वन् । जीवेन सह प्राणस्यापि शरीराद्वहिर्गमने मरणप्रसंगात् । यथाकश्चित् राजास्वकीयं रगरं स्वस्थितिकाले स्वयमेव रक्षति, अन्यथा रक्षितुरभावे विप्लवापत्तेः । यदा स राजा राज्यकार्यमासाद्य वहिर्गच्छति तदा स्वामात्यद्वारानगररक्षां करोति व्यवस्थापयितुरभावे चौरादिना विप्लवसम्भवात् तथा यदाऽयं जीवो देहाद्वहिर्याति तस्मिन्समये स्वामात्यभूतेन प्राणेन शरीररक्षां कारयति । अन्यथा शरीरविनाश एव भवेत् । ततः प्राणं स्वामात्यं शरीररक्षायां विनियोज्य स्वयं कुलायात् कुलायोपमितात् जाग्रतशरीरात् बहिश्चरि बहिर्गत्वा । यत्र यस्मिन्देशे कामं काम्यते इति कामं भोग्य वस्तुजातम् तत्र तत्र तदुपभोगाय चरित्वा संचरणं कृत्वा भोग्यजातमुपभुज्य अमृतः स्वभावतोऽमरणधर्मा हिरण्मयः स्वयं प्रकशलक्षणः अप्रकाशात्मकत्वे विनिपातप्रसंगात् एक हंसः सहायकान्तरनिरपेक्षः पुरुषः पुरि शयनात् पुरुषः ईयते । स्वस्थानं शरीरं प्रत्यागच्छति । अदृष्टवशात् शरीरात् बहिर्गत्वा यत्रोपभोग्यं तत्र तदुपभुज्योपभोगप्रयोजकादृष्टपरिक्षये पुनरपि स्वकीयं स्थानं प्राणरक्षितं शरीरमाविशतीति ॥१२॥

शरीराद्विनिर्गत्य स्वप्नसमये कमनीयवस्तूपभोगं करोतीत्युक्तं तत्र कमनीयं किमिति प्रश्ने कमनीयविशेषं दर्शयितुमाह–

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ।।

उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ।।१३।।

आराममस्य पश्यन्ति न तं पश्यति कश्चनेति तन्नायतं बोधयेदित्याहुः ।।

(स्वप्नान्ते इत्यादि) स्वप्नान्ते स्वप्नमध्ये प्रकृतेऽन्नशब्दस्य मध्यबोधकत्वात् । देवो जीवो द्योतनात्मकत्वाद्देवः । उच्चावचं पुण्यपापलक्षणमुत्तमाधमं ईयमानः संगच्छमानः बहूनि अनेकप्रकारकाणि रूपाणि देवादि शरीराणि कुरुते भजति देवादिशरीरमवाप्य तदुचितान् भोगान् करोति । उते वापि स्त्रीभिः सह मोदमानो भवति स्त्रीभिः सह विहारादिकं कुर्वन्निव भवति जक्षदिवभवति जक्षणं भक्षणं हसनं वा । क्वचित् भयानि भयजनकानि व्याघ्रादीनि भयप्रयोजकान्यपि पश्यन्भवति बिभेति भयभीतो भवति अनेनेतिभयानि व्याघ्रादिकानि अदृष्टवशात् तत्तदुपभोग्यवस्तुजातानि पश्यति तत्र शुभादृष्टवशात् शुभं पश्यति अशुभादृष्टवशादशुभं पश्यतीति ।।१३।।

ननु यथा भोग्यं वस्तु लोकोऽवगच्छति तथा भोक्तारं जीवं देहाद्विनिर्गतं कथं न जानाति तत्राह–

(आराममस्य पश्यन्तीत्यादि) अस्य स्वप्नदृशो जीवस्याराममुपकरणभूतमुद्यानवनादिकं सर्वेऽपि जनाः पश्यन्ति इन्द्रियग्राह्यत्वादुपकरणानाम् । परन्तु तं जीवं शरीरेन्द्रियादिभ्योभिन्नमन्तर्वहिर्वा संचरन्तमपि न कश्चन न कोपि लोकः पश्यति । उपकरणस्य पराग्रूपत्वेनेन्द्रियाग्राह्यत्वं सभवत्यपि किन्तु इन्द्रियाग्राह्य तमात्मानं न कोपि पश्यतीत्याश्चर्यत्वेनानुक्रोशमुपक्रोशं लोकं प्रति दर्शयति श्रुतिः । इति शब्दो मंत्र परिसमाप्तिद्योतक इति । लोकप्रसिद्धिरपि तथैवेति श्रुतिराह–

दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यतेऽथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त

(तं नायतमित्यादि) स्वप्नसमये सर्वाणीन्द्रियाणि उपहृत्य जीवो बहिर्याति तस्मात्कारणात् आयतं गाढप्रसुप्तं जीवं न बोधयेत् नोत्थापयेदिति शरीरविज्ञानवादिनश्चिकित्सका आहुः कथयन्ति । सुप्तस्योत्थाने दोषं पश्यन्ति । दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते । शरीराद् बहिर्गतो जीवो यमिन्द्रियप्रदेशं न प्रतिपद्यते कदाचित् व्यत्यासेनेन्द्रियान्तरस्येन्द्रियान्तर गोलके प्रवेशयेत् एवं सति आन्ध्यादिदोषप्राप्तौ दुर्भिषज्य दुःखेन भिषज्यकर्मास्मै दोषाय भवति । अयं दोषो असमाधेय एव भवेत् । अयं भावः स्वापसमये सर्वामिन्द्रियमात्रामुपादाय जीवो बहिर्याति । यदि स्वस्थतया आगच्छति तदा तत्तदिन्द्रियं तत्तदिन्द्रिगोलके स्थापयति व्यग्रत्वे इन्द्रियान्तर स्येन्द्रियान्तर गोलके गमनेन महदनर्थसम्भावना स्यात् अतः शयानं सहसा नोत्थापयेत् । तदुक्तं "नैकःस्वपेत् शून्यगेहे शयानं न प्रबोधयेत् । नैकः पर्वतमारोहेत् नैकः सुप्तेषु जागृयात्" अतः सहसोत्थापनं महदनर्थायेति । एतदधिकृत्य विशेषविचारः स्थानान्तरेस्यादिति कृतमत्रपल्लवितेनेति ।

(अथो खल्वाहुरित्यादि) अथो खलु केचनान्ये एवमाहुः कथयन्ति । किं कथयन्ति तत्राह–

(जागरितदेशे इत्यादि) अस्य जीवस्य जागरितदेशे एव जागरितस्थाने एवास्य जीवस्यैषः स्वप्नः नतु स्थानान्तरे स्वप्न इति । कस्मात् जागरितदेशे एव स्वप्नस्तत्रकारणमाह–

(यानि इत्यादि) अयं जीवो यान्येव रथादीनि जाग्रत पश्यति जाग्रदवस्थायां पश्यति साक्षात्करोति तान्येव वस्तूनि सुप्त इति स्वप्नावस्थायामपि तान्येववस्तुजातानि साक्षात्करोति न ततोभिन्नानीति । अत्र मतान्तरप्रदर्शनस्यायमभिप्रायः स्वप्नदृक् पुरुष इन्द्रियाद्युपरमे एव स्वप्नान्पश्यति अतो

इत्यत्रायं पुरुषः स्वयंज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥१४॥

यत्रेन्द्रियस्याप्यवकाशो नास्ति तत्र जागरितदेशस्थरथादिपदार्थानामवकाशः कथं सम्भवेत् तस्मात्स्वप्नस्थानं तृतीयस्थानमिति । अन्ये तु केचनैवं कथयन्ति यत् अथोखल्वित्यादिग्रन्थो न मतान्तरप्रदर्शनपरकोऽपि तु पूर्वसमर्थितार्थप्रतिपादक एव न तु मतान्तरप्रदर्शनपरक एव । तत्र जागरितदेश इत्यत्र ईषदसमाप्त्यर्थे देश्यप्रत्ययः छान्दसत्वात यकारस्य लोपः ततश्च जागरितदेश इत्यस्य जागरितादीषन्न्यूनमित्यर्थः । स्वप्पनदृष्टार्थस्य-दिनान्तरेऽनुभवायोग्यत्वमेवेषन्न्यूनत्वम् । पमुमेवार्थमुपपत्तिमुखेन प्रदर्शयति

(यानि एवेत्यादि) यानि हस्तिरथादीनि जाग्रत्काले पश्यति तान्येव वस्तुजातानि अर्थक्रियासमर्थानि स्वप्नकालेपि स्वप्नदृक् पश्यति तस्मात् स्वाप्निकार्थाः सृष्टा एव भवन्ति । तत इहलोकपरलोकातिरिक्तस्थानान्तर-मेव स्वप्नस्थानमिति प्रतिपादयन्तीति । पूर्वप्रतिपादित आत्मनः स्वयं ज्योतिष्ट्वमुपसंहरन्नाह

(अत्रायमित्यादि) हे जनक ! अत्र स्वप्नावस्थायाम् अयं पुरुषो जीवः स्वयं ज्योतिर्भवतीति । एवं याज्ञवल्क्यस्योपपत्तिमद्वचनं श्रुत्वा ज्ञातात्म प्रकाशको जनकः प्राह–

(सो हमित्यादि) हे भगवन् सोहं प्राप्तस्वयंज्योतिष्ट्व विद्यः तद्विद्यानिष्क्रमत्वेन भगवते तुभ्य सहस्रं गवां दक्षिणारूपेण ददामि । प्रतिपादयामीति–

(अत ऊर्ध्वमित्यादि) अत ऊर्ध्वमतः परं विमोक्षाय संसारनिवृत्तये ब्रूहि संसारस्य निवृत्तिसाधनं कथय । एतदतिरिक्तस्य प्रयोजनं नास्ति । सर्वोऽपि कर्मकलापः संसारायैव भवति, अतः संसारनिवृत्तिसाधनमेव मे प्रति-पादयतु भगवानिति ॥१४॥

स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नायैव स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्या-

(स वा एष एतस्मिन्नित्यादि) स वा एष जीव एतस्मिन् संप्रसादे स्वप्ने सम्प्रसीदति सुप्रसन्नो भवति अस्मिन्निति संप्रसादः स्वप्नः जागरितावस्थायां शरीरेन्द्रियप्रभृतीनां व्यापारशते सम्पर्कजनितकालुष्यं भवति जीवस्य तेभ्यः कालुष्यादिभ्यो रहितः स्वप्नावस्थायां लेशतः प्रसीदति सुप्रसन्नो भवति । अतः सम्प्रसादशब्देन स्वप्नस्थानमेव बोधितं भवति । यद्यपि संप्रसादशब्दो मुख्यया वृत्त्या सुषुप्तौ रूढ़स्तथापीतः पूर्वं स्वप्नस्य प्रस्तुतत्वात् स्वप्नस्य एतस्मिन्संप्रसादे इत्यत्र ग्रहणं युक्तम् एवं सति सप्तम्यन्तयोर्द्वयोः सामानाधिकरण्यमपि उपपद्यते । सम्प्रसादे सुषुप्तौ गन्तुं प्रवृत्ते सति जीवे एतदधिकं पूरणीयमिति । तस्मिन्संप्रसादे स एष जीवो रत्वा रमणं क्रीडां कृत्वा । रमेरनिट्त्वात् अनुनासिकलोपे रत्वेति प्रयोग इति शाब्दिकानां परिभाषा । चरित्वा विहारादिकं कृत्वा भक्षयित्वा वा दृष्ट्वैव पुण्यं पापं वा पुण्यफलं मनोज्ञानवस्त्रवनितादिकं मनसः प्रीतिजनकं पापं पापफलं वीभत्सभयानकादिव्याघ्रादिकं भयप्रदं दृष्टवा समनुभूय प्रतिन्यायं येन प्रकारेण तत्रगतोऽभूत् तेनैवक्रमेण स्वप्नायैव स्वप्नानुभवार्थं प्रतियोन्याद्रवति प्रत्यागच्छति । प्रतियोन्याद्रवतीत्यत्र योनिशब्दः स्थानवाचीति—

(स यत्तत्रेत्यादि) स जीवस्तत्र जाग्रदादिकाले यत् यत् किञ्चित् शुभमशुभ वा मनुष्यव्याघ्रादिशरीरादिकमात्मीयत्वेन पश्यति साक्षात्करोति तेन साक्षात्कृतेन वस्तुना अनन्वागतोऽननुसृतः सम्बन्धरहितो भवति अथवा स स्वप्नदृक् जीवस्तत्र स्वप्नसमये यत्किंचित्पश्यतितेनान्वागतः सम्बद्धो न भवति । स स्वप्नदृक् केवलं पश्यत्येव नतु करोति । कारणादेव

वल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५॥

स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवति बुद्धान्तायैव स यत्तत्र

सम्बद्धो भवति नतु दर्शनात् । न हि अग्निदर्शकोऽग्निना सम्बद्धो भवति अतो जाग्रत्कालिकपदार्थजातं पश्यन्नपि तदा तत्सम्बन्धरहित एव भवतीति । असम्बन्धे कारणं दर्शयति—

(असंगोह्ययं पुरुष इतीति) अयं जीवः पुरुष इति नामधारी असंगः सम्बन्धरहितः कर्माविद्यामूलककार्यकरणसमुदायात्मक शरीरेण स्वभावतोऽसंगत्वात् । यदि कदाचिदेतस्य केनचित्संगः स्वाभाविकः स्यात् । भवेत्तदास्य तस्य पदार्थस्यानुवर्तनम् नत्वेवमात्मनः स्वभावः स तु परमात्मांशत्वात् सर्वदैव निर्मलो गगनवत् । तस्मादसंगस्वभावत्वात् जाग्रत्कालिकपरिदृष्टपदार्थानामननुवृत्तिर्युज्यते एवेति । एव याज्ञवल्क्यवचनं श्रुत्वा तदंगीकुर्वन् प्रोवाच जनक—

(एवमेवैतदित्यादि) हे याज्ञवल्क्य ! यत् भवता कथितं तदेवमेव तत्सर्वं सम्यगेव । सोहं जनकस्तव प्रसादात् विदितात्मवृत्तस्तद्दक्षिणारूपेण भगवते पूजावते तुभ्यं गवां सहस्रं ददामि अर्पयामि । अत ऊर्ध्वमतःपरं विमोक्षाय संसारनिवृत्तिसाधनाय ब्रूहि यावता संसारनिवृत्तिर्भवेत् तादृशं साधनं मे कथयेति ॥१५॥

विमोक्षायैव ब्रूहीति जनकवचनमुपश्रुत्य याज्ञवल्क्यः प्राह—

(स वा एष एतस्मिन्नित्यादि) स वा एष प्रकृतो जीव एतस्मिन् प्रकृते स्वप्नान्ते स्वप्नस्थाने । यद्यपि अन्तशब्दोऽनेकार्थकः समाप्तिस्थाननिर्णयाभ्यन्तरादिवाचकस्तथापि प्रकृते योग्यत्वात्प्रकरणाच्च स्थानवाची एव । तथा

किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत उर्ध्वं विमोक्षायैव ब्रूहीति ।।१६।।

च प्रकृते स्वप्नस्थाने रत्वा रमणं कृत्वा चरित्वा भक्षयित्वा विहरणादिकं कृत्वा पुण्यं पुण्योपनीतं स्रक्चन्दनादिस्वानुकूलम् पापं पापोपनीतं बीभत्स भयानकादि व्याघ्रादिकं प्रतिकूलं दृष्ट्वा साक्षात्कृत्य पुनः पुनरपि पूर्वसंस्कारबलात् प्रतिन्यायं येनैवक्रमेण गतवानभवत् तेनैव मार्गेण प्रति योन्याद्रवति प्रत्यागतो भवति । कुत्र प्रत्यागतो भवति तत्राह

(बुद्धान्ता दंवेति) तत्र बुद्धं बोधो ज्ञानम् अन्तशब्दः स्थान वाचकस्तथा च स्थिरबोधस्थानाय जाग्रत स्थानायेत्यर्थः । जाग्रत्स्थानस्यस्थिरबोधस्थानत्वं नाम दृढतरसंस्कारोत्पादकत्वमेव । जाग्रत्कालिकपदार्थज्ञानस्य संस्कारद्वारा बाहुल्येन स्मरणजनकत्वस्य दृष्टत्वात् । ततश्च जाग्रत्स्थानार्थं पुनरपि जीवः स्वप्नस्थानादागतो भवति ।

(स यत्तत्रेत्यादि) स जीवस्तत्र प्रबोधावस्थायाम् यत्किंचित् पश्यति घटादिकं साक्षात्करोति तेन परिदृष्टेन पदार्थेन सहानन्वागत एव भवति तत्तत्पदार्थसम्बन्धरहित एव भवति यतः यं पुरुषः अतिसूक्ष्मतया स्वभावतः सर्वं सम्बन्धरहितत्वात् एतदुपश्रुत्य जनकः प्राह–

हे याज्ञवल्क्य ! एवमेवैतत् यदुक्तं तत्सम्यगेव । सोहं ज्ञातवृत्तो जनक भगवते पूजार्हाय तुभ्यं गवां सहस्रं दक्षिणारूपेण ददामि प्रयच्छामि । कृपां कृत्वा अत ऊर्ध्वमतः परं विमोक्षाय ब्रूहि । सावतासंसारनिवृत्तिर्भवेत् तादृशं साधनमुपदिशेति ।।१६।।

स वा एष एतस्मिन् बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नान्तायैव ॥१७॥

तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति पूर्वञ्चापरञ्चैवमेवायं

(स वा एष इत्यादि) विमोक्ष साधनं वक्तुं याज्ञवल्क्यः प्राह हे जनक ! स वा एष जीव एतस्मिन् बुद्धान्ते प्रबोधावस्थायां रत्वा रमणं कृत्वा चरित्वा भक्षणविहारादिकं यथेच्छं संपाद्य पुण्यं पुण्योपनीतं स्रगादिकं पापं पापोपनीतं भयानकादिकं वस्तुजातं दृष्ट्वैव समनुभूय श्रान्त इव यत्किंचित् स्वास्थ्यलाभाय पुनः पुनरपि प्रतिन्यायं पूर्वक्रमेण स्वप्नाय स्वप्नस्थानाय प्रतियोन्या द्रवति गच्छति । प्रबोधात् स्वप्नेगच्छति स्वप्न-स्थानात्प्रबोधे आगच्छति पुनरपि प्रबोधात् स्वप्ने गच्छति । एवं क्रमेण खण्डत्रयेण जागरितस्थानात्स्वप्नस्थानं स्वप्नस्थानात्बुद्धान्तं बुद्धान्तात्स्वप्न-स्थानं जीवो गच्छत्यारोहावरोहसञ्चारप्रदर्शनात् संसारचक्रप्रवृत्तेर्नैयत्वं दर्शितं भवति । यथा घटीयन्त्रमनवरतं क्रियाशीलमेव भवति तथा जीव-स्याप्ययं संसारे यावत्तत्त्वज्ञानमवस्थित एव भवतीति संसारात्वैराग्यं व्यञ्जितमिति भावः ॥१७॥

कर्मजालावृतस्य जीवस्य स्वप्नजागरितोभयस्थानसञ्चारेऽनुरूप दृष्टान्तं दर्शयितुमाह—

(तद्यथा महामत्स्य इत्यादि) यथा येन प्रकारेण महामत्स्यो राघव-नामः श्रूयते किल 'तिमिंगिलो नाममत्स्यः शतयोजन विस्तरः । तिमिङ्गि-लोप्यस्ति तद्गिलोप्यस्ति राघवः" इति इतादृशो महामत्स्यो महाजलस्योभे कूले उभयतटे अनुसञ्चरति । महाजले वर्तमानो महामत्स्यः पार्श्वाभ्यां तटद्वयं स्पृशन् याति । पूर्वं तटं अपरं पश्चिमं तटम् । उत्तर-मुखावस्थित महामत्स्य पूर्वपश्चिमतटस्पर्शः पूर्वाभिमुखस्य तु दक्षिणो-त्तरतटस्पर्शो ज्ञातव्य इति । एवमेव महामत्स्यदृष्टान्तेनायं पुरुषो

पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तञ्च बुद्धान्तञ्च ।।१८।।

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ सल्लयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति ।।१६।।

जीव एतावुभावन्तौ स्वप्नान्तवुद्धान्तौ अनुसञ्चरति महामत्स्यवत् मध्येऽवस्थित उभावध्यन्तौ स्पृशति । स्वप्नान्तं स्वप्नस्थानं बुद्धान्तं प्रबोध-स्थानं चेति ।।१८।।

एवं क्रमिकस्थानद्वये जीवस्य सञ्चारं दर्शयित्वा सुषुप्तिदशां यत्र जीवः सर्वथैव कार्यकरणश्रमरहितः सुप्रसन्नः सुस्थो भवतीति दर्शयितुमाह-(तद्यथाऽस्मिन् आकाशे इत्यादि) यथा येन प्रकारेणास्मिन् भूताकाशे श्येनो बलवीर्यशालिपक्षिविशेषः सुपर्णो गरुडो वा विपरिवर्त्य इतस्तत उड्डयेन श्रान्तः श्रमयुक्तो भवन् श्रमापनोदनार्थं सुखप्राप्तये च पक्षौ संहत्य उड्डयन-करणं पक्षद्वयं संकोच्य संलयाय समीचीननीडप्राप्तये ध्रियतेऽवतिष्ठत्तेवास-वृक्षमालबते । एवमेव तेनैवप्रकारेणायं पुरुषो जीवो बुद्धान्तस्वप्नान्तस्थानद्व-येऽनवरतसंचरणेनातीवश्रान्तो भवन् एतस्मै अन्ताय त्रिलक्षणस्थानाय धावति स्थानद्वये सञ्चरण जनितश्रमापनोदनाय निरतिशयसुखसदृश सुखायाप्त-ये च गच्छति पत्र च सुप्तौ यस्मिन्सुषुप्तिस्थाने गतः सन् न कंचन कामं कामयते केनापि कामादिना दुःखकारेणोपहृतो न भवति न कचन कमपि स्वप्नं पश्यति स्वप्नान्पदार्थान्तरान्वा न पश्यति तादृशस्थान-विशेषाय धावति । तादृशस्थानविशेषं प्राप्य सर्वथा सुखीभवति न तु जाग-रितस्वप्नस्थानप्रयुक्तदुःखी न भवति सर्वथैव स्थानद्वयदुःखरहितो भवतीति भावः ।।१६।।

ता वा अस्यैता हिता नामनाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिवन्तीव हस्तीव विच्छायवयति गर्त्तमिव पतति । यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ

ननु क्वचित् स्थानविशेषे जीवस्य स्वदुःखं भवति क्वचित् स्थानविशेषे तन्न भवतीति तत्र को हेतुरिति शंकायां स्थानवैषम्यकृतमेव तदिति द्योतयितुमाह–

(ता वा अस्यैता हिता इत्यादि) ता एताहितानाम नाड्यो भवन्ति यथाकेशः सहस्रधा भिन्नः तावताऽणिम्नास्तिष्ठन्ति केशादप्यतिशयेन सूक्ष्मामास्तानाड्यः शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णास्ताः केशसहस्रभागादपि सूक्ष्मा अन्नरसादिपूर्णास्तानाड्यो भवन्तीति । यत्र नाड्यांस्थितमेनं जीवं केचन घ्नन्तीव केचन जिनन्तीवभवति । हस्ताय विच्छायति विद्रावयतीव भवति गर्तं पततीव भवति । विविधभयेन पीडित इव भवति ।

(यदेवेत्यादि) यत् जाग्रद् भयं पश्यति जागरितकाले यदेव यदेव भयकारणं हस्तिब्याघ्रादिकं साक्षात्करोति । तत्सर्वमेवात्र नाडीमध्ये अविद्यया कर्मणा मन्यते प्राप्नोति । यथा जागरणकाले भयसाधने पश्यति तादृशमेव भयसाधनं कर्मबलात्तत्रापि पश्यति । हितनामकस्वप्नवह नाडीमध्येऽस्थितस्य जीवस्य कर्मसम्बन्धस्य विद्यमानत्वात् तद्वतेन भीषणस्वाप्निकपदार्थानां प्रतिभानं भवत्येवेति भावः ।

(अथ यत्र देव इत्यादि) अथानन्तरं यत्र यस्मिन् स्थाने जीवो देव इव राजवत् । राजा इव महाराजवत् वा अहमेवेति सर्वोस्मीति मन्यते ।

(स यथा कुमारो वा महाराजोवेत्यादि) बालाकिब्राह्मणोक्तप्रकारेण यादृशस्थानविशेषे वर्तमानस्य जीवस्यानन्दविशेषस्यानुभवो

यत्र देव इव राजेवाहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥२०॥

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् तद्वा

भवति स भिन्नानुकूलप्रतिकूलवस्तूनामनुपलम्भमूलको भवति सोऽस्यजीवस्य परम उत्कृष्टो लोको मुख्याश्रयः परमेश्वर एवेति भावः ॥२०॥

(तद्वेत्यादि) तत् तदा तस्मिन्कालेऽस्य अतिच्छन्दा । छन्दः शब्दस्येच्छावाचकत्वम् । ततश्च यथेच्छम् अपहतपाप्माभयम् पापभयादि-रहितं परमप्रियं प्राप्यं रूपम् परमेश्वर एव नान्य इति । एतावता किमभूत्तत्राह—

(तद्यथा प्रिययेत्यादि) तद्यथा येन प्रकारेण प्रियया मनोनुकूलया स्त्रिया पत्यासंपरिष्वक्तो गाढमालिंगितो बाह्यं वस्तुजातं न जानाति आन्तरमपि न किमपि जानाति तदासक्तत्वात् एवमेव तथैवातिप्रियेण प्राज्ञेन परमेश्वरेण सम्परिष्वक्तस्तद्रूपतां प्राप्तः अत्र परमेश्वरेण सम्परिष्वंगस्तस्मिन् सर्वनिदाने लय एव । ततश्च परमेश्वरे लीनो जीवः न बाह्यं वेद विजानाति अन्तरमेवविजानाति । परमात्मति लीनस्य जीवस्य वाह्याभ्यान्तर ज्ञाना-भावो भवतीति । अथवा जागरित स्वप्नीयभोगप्रयोजनक शुभाशुभकर्म विरोधी सम्बन्धविशेषः सुषुप्तिकाले भवतीति ;

(तद्वाऽस्येत्यादि) अस्यजीवस्यपरमेश्वरलीनस्यतदेव रूपं प्राप्यम् यत् रूपं परमात्मलक्षणम् आप्तकामं प्राप्तसर्वकामनामयम् । समवाप्तसमस्त-काममित्यर्थः । आत्मकामम् आत्माभिन्न समस्तकामनारहितम् । अकामम शोकान्तरम् सर्वशोकशोकप्रयोजकबहिर्भूतम् । प्रकृतेऽन्तरशब्दस्य बहिर्योग-

अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ।।२१।।

अत्र पिताऽपिता भवति माताऽमाता लोको अलोका देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रणमस्तापसोऽताप-

वचनत्वात् । एतादृशपरमात्मलक्षणरूपमेवजीवस्य परमप्रियं प्राप्यं च । सर्वलोकाभिरामं लोकोत्तरं साकेताधिपतिमवाप्यैवजीः कृतार्थो भवतीति भावः ।।२१।।

(अत्रपितेत्यादि) अत्र परमेश्वरलक्षणसुषुप्तिस्थाने संप्रलीनस्य जीवस्य पिता जनकोऽपिताऽजनको भवति । पितुर्हि प्रकृतपाचभौतिक शरीरेणसहैवजनकताख्यः सं च सम्बन्धः सम्बन्धिन एकस्य पांचभौतिक-स्याभिमानाभावात् विनष्ट इति शरीरद्वाररेण संबन्धस्यपितुरपि पितृत्वं लीनजीवं प्रतिनिवर्ततेऽतः कथित पिताऽपिता भवतीति । एवं तत्काले माता जननी अमाता जननी न भवति पुर्वोक्तयुक्तेरेवेति । लोका अलोका भवन्तीति । लोका भूरादयः परमेश्वरलक्षणसुषुप्तौ वर्तमानस्यजीवस्यालोका भवन्ति । बाह्याभ्यन्तराश्रयशून्यत्वात् तत्कालिकजीवस्येति । देवा अदेवाः देवाइन्द्रादयोऽदेवाअनुपास्या भवन्ति । अयं भावः शरीरसम्बन्धवानेव जीवः स्वर्गादिप्राप्त्येदेवोपासन यज्ञादि द्वारेण करोति परमात्मा निलीनस्य तु शरीरसंबन्धा भावात् शरीरोपास्यादेवा अनुपास्यत्वात् अदेवा भवन्तीति । वेदा अवेदा भवन्ति । हिताहितवस्तुनिवोधकतया वेदादिशास्त्रमनुशासकंभवति जीवस्तनुशासनीयोभवति संप्रति अननुशासनीयस्वरूपत्वात् वेदाः शासका-अपि अवेदा अशासका एवेति । अत्रास्यामवस्थायां परमात्मलीनः स्तेनः छन्नो भूत्वा परद्रव्यापहारी अस्तेनोऽचौरो भवति । परिशुद्धात्मस्वरूपे तस्मिन् स्तैन्यकार्यं प्रति कर्तृत्वस्यासम्भवात् । भ्रूणहा गर्भविनाशकर्ता अपि अभ्रूणहा भवति पूर्वोक्तयुक्तिरेव । चाण्डालो निष्कृष्टजातीयोपि अचाण्डालो

सोनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति ।।२२।।

भवति जातेर्देहसम्बन्धत्वात् । देहाभिमानस्य तदा तस्मिन् अभावात् पौल्कसो जातिविशेषवान् अपौल्कसो भवति । श्रमणः परित्यक्तपुत्राद्येषणः परिव्राडपि अश्रमणो भवति । तापसो वानप्रस्थाश्रमविशेषोप्यतापसो भवति । तपः प्रभृतिप्रति तदानीं तस्य कर्तृत्वासम्भवादिति । पिताऽपिता भवतीत्यारभ्य तापसोऽतापसोभवत्यन्तवाक्ये हेतोरकथनात् हेतुविशेषं दर्शयितुमाह-

(अनन्वागतमित्यादि) सुषुप्त्यवस्थायां जीवः पुण्येनानन्वागतं पुण्यकर्मणा संबद्धो न भवति एवं पापेनाननन्वागतं पापकर्मणापि संबद्धो न भवति । शरीरेन्द्रियसम्बन्धप्रयोजकपुण्यपापाख्यकर्मणोरसंम्बन्धात सुषुप्त्यवस्थायां जीवस्य पित्रादयोऽपित्रादयो भवन्तीति भावः । ननु यदाऽन्तिमशरीरस्य वियोगः स्यात् तदैव सर्वकर्मणां वियोगः स्यात् नान्यथा । अन्यथा तदानीमपि कर्माभावे सुषुप्तस्य पुनरुत्थानं न स्यादिति प्रयत्नमन्तरेणैव संसाराभावः प्रसज्येत तत्कथं सुप्तौ कर्मसम्बन्धाभावो जीवस्येतीमां शंकामपनेतुमाह-

(तीर्णो हि तदेत्यादि) तदा सुषुप्तिसमये जीवो हृदयस्य सर्वान् शोकान् शोकप्रयोजकान् तीर्णो भवति मनस्तापरूपफलाभावात् । यद्यपि तदानीमपि बीजरूपेण कर्म विद्यते एव तथापि कर्मणां फलाभिमुखत्वाभावे न कर्मणामसम्ब्रन्धतुल्यत्वात् तत्प्रयोज्यशरीराद्यभावेन शरीरसंबन्धिमाता-पितृलोकादयो न भवन्तीति भावः ।।२२।।

ननु ज्ञातृलक्षणजीवस्य सुषुप्त्यवस्थायां बाह्याभ्यन्तरज्ञानाभावो भवतीति प्राक् प्रतिपादितः किन्तु तस्य कारणं किमिति जिज्ञास्यमानं प्रत्याह-

यद्वै तन्न पश्यति पश्यन्वैतन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥२३॥

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥२४॥

(तद्वैतन्नपश्यतीत्यादि) तदानीं सुषुप्तिसमये बाह्यमान्तरं वा किमपि न पश्येत् सामग्रीविरहात् । तत् साक्षात्कुर्वत एव बाह्यस्यान्तरस्य वा पदार्थस्यादर्शनम् । यतो ज्ञातुरात्मनो धर्मलक्षणस्य ज्ञानस्याविनाशित्वात् नित्यत्वात् । यदा धर्मी आत्मा नित्यस्तदा तद्धर्मभूतं ज्ञानमपि नित्यमेव धर्मधर्मिणोरभेदात् । अतो ज्ञानस्वरूपाभावप्रयोज्यो बाह्याभ्यन्तरं द्वितीयज्ञानस्यातो न कथमपि भवति । किन्तु ततोऽविभक्तस्य प्राज्ञात्मनः प्रथक्सिद्धस्यान्यपदार्थस्याभावादेव कारणात् अनुकूलप्रतिकूलपदार्थानामदर्शनं भवतीति । न च पृथक्सिद्धपदार्थानामभावो जाग्रत्स्वप्नयोरपि सम एवेति :जाग्रत्स्वप्नवत् सुषुप्तिकालेपि पृथक्सिद्धपदार्थानुभवोऽस्तीति वाच्यं जाग्रत्स्वप्नावस्थायां शुभाशुभकर्मरूपदोषबलात् पृथक् सिद्धपदार्थानामुपलम्भसम्भवेपि सुषुप्तिकाले शुभाशुभकर्मसम्बन्धस्याभावात् पदार्थोपलभस्यासंभवात् । न चापृथक्सिद्धतया ब्रह्मात्मकत्वेन विषयाणां घटपटप्रभृतीनामुपलम्भो भवतु इति वाच्यम् "एतं ब्रह्मलोकं न विन्दन्ति अनृतेन प्रत्यूढाः" इत्यादि श्रुत्यन्तरप्रदर्शितक्रमेण । अनृतपदप्रतिपादितकर्मविशेषतिरोहिततया ब्रह्मण उपलम्भासम्भवात् तत एव ब्रह्मात्मकत्वरूपेणापि पदार्थानामुपलम्भस्यापादयितुमशक्यत्वात् ब्रह्मरूपत्वाब्रह्मरूपत्वोभयरहितपदार्थान्तरस्यासम्भवेनाभावात् इति सूक्तं यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादि ॥२३॥

यद्वैतन्नजिघ्रतीत्यारभ्य यद्वैतन्नविजानातीतिमन्त्रपर्यन्तमन्त्रायद्वैतन्न

यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयते-र्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्वि-भक्तं यद्रसयेत् ।।२५।।

यद्वै तन्न वदति वदन् वै तन्न वदति न हि वक्तुर्वक्तेर्विपरि-लोपो विद्ययेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ।।२६।।

यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विप-रिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणयात् ।।२७।।

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मन्तुर्मतेर्विपरि-लोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ।।२८।।

यद्वै तन्न स्पृशति स्पृशन् वै तन्न स्पृशति न हि स्प्रष्टुः स्पृष्टे-र्विपरिलोपो विद्यतेऽविनाशित्वान्नतु तद्द्वितीयमस्ति ततोऽन्यद्वि-भक्तं यत् स्पृशेत ।।२९।।

यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ।।३०।।

पश्यतीत्यादि मंत्रवदेव भावार्थमात्राविष्करणेन व्याख्येयाः ।।३०।।

ननु यथा सुषुप्तिसमये परमात्मपृथक्सिद्धपदार्थानामभावेन ज्ञान-करणचक्षुरादीनामभावेन च बाह्याभ्यन्तरपदार्थोपलम्भो न भवति न तथा

यत्र वाऽन्यादिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ।।३१।।

सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैन-

स्वप्नादिस्थाने यतस्तदा तत्पृथक्सिद्धपदार्थसद्भावात् ज्ञानकरणस्य सद्भावाच्चेत्याशयेनाह–

(यत्र याऽन्यदिव स्यादित्यादि) यत्र यस्मिन्स्थाने जाग्रदादौ । अन्यदिवस्यात् परमेश्वरात् पृथकसिद्धमल्पं वा वस्तु दृश्यं कर्मीभूतभवेत् । तथा ज्ञानकरणमिन्द्रियादिकं च पृथक् सिद्धमिव भवेत् । तदा तत्र स्वप्नस्थानादौ । अन्यः कर्ता अन्यत्किंचित दृश्यं कर्मलक्षणं केनचित् ज्ञानकरणेन चक्षुरादिना पश्येत् साक्षात् कुर्यात् । एवमन्योऽन्यद दृश्यं पृथक्सिद्ध गन्धादिकं जिघ्रेत् घ्राणेन गन्धज्ञानमुत्पादयेत् । अन्योऽन्यत् रसादिकं रसयेत रसनया साक्षात्कारं कुर्यात् । वदेत् शृणुयात् मन्वीत विजानीयादपि पृथक्सिद्धावस्थायाम् । सुषुप्तौ तु परमात्मपृथक्सिद्धदृश्यपदार्थानामभावात् कर्मणां भोगप्रदत्वाभावे सकारणभूतेन्द्रियादिसम्बन्धानामभावादपि अन्यदृश्यवस्तुनो दर्शनादिकं न भवति । तदयं निर्गलितोर्थः प्रकरणस्य । यत्र खलु परमात्मपृथक्सिद्धवस्तुनः सत्वमिन्द्रियादिकं कर्मणि भोगप्रदत्वं तत्र पदार्थानामुपलम्भो भवति यत्र तु सुप्तौ नैवं तत्र ज्ञातृधर्मभूतज्ञानस्य विद्यमानत्वेपि पदार्थोपलम्भो न भवतीति ।।३१।।

(सलिल एक इत्यादि) सलिलो जलवदतिशयेन स्वच्छः द्रष्टा जीवोऽद्वैतो भवति । अयं भावः यथा जलराशौ प्रक्षिप्तं जलमेकमेकरूपतामेव याति तथैव जलवत् स्वच्छस्वभावे परमेश्वरे लीनो जलबिन्दुवत् जीवो द्रष्टा प्राज्ञात्मपरिष्वंगात् एकीभूतः सन् अद्वैतो भवति अर्थात् परमात्मपरिष्वगात पूर्वं देवमनुष्यादिविविधाकारेणाकारवानासीत् तं तं

मनुशशास याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।३२।।

चाकारविशेषमपहाय परमात्मैकरूपतामादधानो द्वैतो भवति । अयमेव विशिष्टाद्वैतस्योद्गार इति । एषः सुषुप्त्याधारो ब्रह्मलोकः परमा । हे सम्राडित्येवं प्रकारेण याज्ञवल्क्यो जनकमनुशशासानुशिष्टवान् उपदेशं दत्तवानिति यावत् । अथ कथं सुषुप्त्याधारः परमेश्वरो ब्रह्मलोको यतो ब्रह्मलोकप्राप्तेरेव परमगतित्वश्रवणात् तत्राह "एषास्य परमा गतिः" अस्य कृतकर्मणो जीवस्य एषा अर्चिरादिमार्गेण प्राप्तिर्ब्रह्मलोकप्राप्तिरेव परमा परमोत्कृष्टा गतिः । आराधितसर्वसाधनस्य ब्रह्मलोकप्राप्तिरेव परमा गतिरर्चिरादिमार्गक्रमेण गमनाद्भवतीति भावः । एषास्य परमा सम्पत् । तत्त्वज्ञानादिना ब्रह्मलोकप्राप्तिरेवास्य जीवस्य परा सर्वत उत्कृष्टा सम्पदिति । एषोस्य परमो लोकः । अस्य जीवस्य एषः परमेश्वर एव परमो नित्यो लोकः भोगस्थानम् । अमुमेव भोगस्थानविशेषमभिलक्ष्यैव श्रुत्यन्तरं "न स पुनरावर्तते ।" अपि भवति एषोस्य परमानन्दः अस्य जीव एषः परमेश्वर एष परमानन्दो निरतिशयानुकूलः । ननु यदि ब्रह्मैव परमान्तस्तदा कथं स्वर्गाद्यनुकूलभोग्येषु जाग्रत्सु कथमानन्दानुभवो जीवस्य तत्राह-

(एतस्यैवेत्यादि) एतस्यैवानन्दस्य परमानन्दस्य मात्रां लेशमात्रमन्यानि भूतानि अन्ये जीवा उपजीवन्ति । अयमाशयः आनन्दोदधिकल्पो भगवानेव तस्यैवानन्दस्य लेशतारतम्येन स्वर्गादिषु अनुकूलभोग्यानुभवो भवति । वस्तुतस्तु ब्रह्मप्राप्तावेवानन्दामनुभवति । स्वर्गादिविषयसम्पर्कजनितसुखानुभवितारस्तु सर्वेपि परमात्मानन्दसहस्रांशस्यानुभवकर्तार एवेति ।।३२।।

तस्य परमेश्वरानन्दस्य निरतिशयपरमानन्दतां द्योतयितुं सातिशया-

स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा

नन्दं प्रपञ्चयति—

(स यो मनुष्याणामित्यादि) मनुष्याणां नराद्यभिमानिनां मध्ये स यः कश्चित्पूर्वपूर्वतरभवोपार्जितकर्मसंघबलात् राद्धो भोगक्षमैर्युवत्यादिभिरन्यैश्च गुणैः संसिद्धः समृद्ध इत्यर्थः तथा बाह्यैर्भोगसाधनैः स्रक्चन्दनवानितादिभिः समृद्धः यदि पूर्णो भवति तथा अन्येषां स्वेतराणां मनुष्याणामधिपतिः स्वतन्त्रो भवति न तु कस्यचिदितरस्याज्ञायां वर्तमानो भवति । तथा सर्वैर्मानुषभोगैः सम्पन्नो भवति मनुष्यो भवैः सर्वभोगैर्भोगोपकरणैरतिशयेन सम्पन्नो युक्तो भवति । स एतादृशो मनुष्याणां मध्ये य आनन्दः स परमानन्दः श्रेष्ठतम आनन्द एकः । अथ मनुष्याणां यं शतं शतसंख्यका आनन्दाः स जितलोकानां पितॄणामेक आनन्दः तत्र जितः श्राद्धतर्पणादिकर्मद्वारा पितृतोषणात् प्राप्तो लोकः पितृलोको यैस्ते जितलोकाः तेषामानन्दो मनुष्यानन्दस्य शतगुणितस्य समानः । अथ ये जितलोकानां पितॄणां शतं शतसंख्यका आनन्दाः स गन्धर्वलोकानामेक आनन्दः । अथ ये शतं शतसंख्यका गन्धर्वलोके आनन्दाः स एक आनन्दः कर्मदेवानाम् । के कर्मदेवास्तत्राह

(ये कर्मणेत्यादि) ये केचन कर्मणा श्रौताग्निहोत्रादिना कर्मविशेषेण देवत्वमभिसम्पद्यन्ते देवभावमासादयन्ति ते कर्मदेवा इति कथ्यन्ते । गन्ध-

देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्म्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये

र्वानन्दस्य शतगुणितस्यैकः कर्मदेवानन्दः । अथ ये कर्मदेवानां शतमानन्दाः स एक आनन्द आजानदेवतानाम् स्वभावसिद्धदेवानां सृष्ट्यादौ जायमानानाम् । यः श्रोत्रियः श्रुतवेदान्तः अवृजिनो निष्पापः तत्र वृजिनं पापं न विद्यते वृजिनं पापं यस्य स अवृजिनाऽपापः अकामहतः न केनापि कामेनहत्तो मुक्त इव वर्तमानः यद्यपितुमुक्ताजानदेवानन्दयोर्महत्तारतम्यं विद्यते तथापि तदानन्दे न्यूनता नास्तीति । अयमभिप्रायः देवो द्विविधः कर्मदेव-आजानदेवश्च तत्र कल्पादावेव जायमानो यष्टव्य इन्द्रवरुणादिः स आजान-देवः यश्च कर्माराधनद्वारा देवभावमासादयति स कर्मदेवः देवलोकं याति तत्रत्यसुखमश्नुते न तु जात्या देवः स कर्मदेवः । अथवा यः त्रयस्त्रिंशत्-देवसायुज्यमाप्नोति स कर्मदेवः त्रयस्त्रिंशद्देवलक्षणत्वमाजानसिद्धत्वमिति । तदेवं कर्मदेवाजानदेवयोर्भेदः तयोरानन्दयोरपि यथाशास्त्रं भेद इति । अथ ये ते आजानदेवानां शतमानन्दाः शतसंख्यका आनन्दाः स एक आनन्दः प्रजापतिलोकीयः अत्र प्रजापतिपदं चतुर्मुखकमलासनलोकपरकम् । न तु दक्षादिप्रजापतिलोकपरकम् । तथा सति एकवचनप्रयोगस्यासाधुता स्यात् । चतुर्मुखलोकपरत्वे तु अपूर्वापरयोः श्रुत्यन्तरस्य च कश्चित् विरोधो भवति ।

(श्रोत्रिय इत्यादि) पदानां पूर्वोक्ता एवार्थाः ज्ञातव्याः । अथ ये प्रजापतिलोके शतमानन्दाः स एको ब्रह्मलोके आनन्दः । न चैवं देवादीना-मानन्दादिवत् ब्रह्मानन्दस्यापि परिच्छिन्नत्वं स्यात् मनुष्यापेक्षया देवा-नन्दस्य शतगुणाधिक्येपि परिच्छिन्नत्ववत् ततश्च निरतिशयानन्दत्वेनैव-भवेदिति वाच्यं प्रजापतिलोकापेक्षया शताधिकत्वकथनस्याधिक्यमात्रे तात्पर्यात् नतु शतत्वादिपरिच्छेदे । यथा इषुरिव सविता या पतीति वाक्यं सूर्यगतौ मन्दतानिवृत्तिपरकम् निमेषमात्रेणानेकयोजनधावित्वस्य

शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक-आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतं प्रजापति लोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियो-ऽवृजिनोऽकामहतोऽथैष एव परम आनन्दः एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं

प्रमाणसिद्धत्वात् । तथैव प्रकृतवाक्यस्यापि कमलासनानन्दापेक्षया आधिक्यमात्रे एव तात्पर्यात् । न ब्रह्मानन्दस्य परिच्छिन्नत्वशंकापि न सम्भवतीति । अथवा "रोमकूपेष्वनंतेषु ब्रह्माण्डानि भ्रमन्ति ते । अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ।। ईदृशानां तथा तत्र कोटि कोटच्ययुतानि च । गंगायां सिकताधारा यथा वर्षति वासवे ।। शक्या गणयितुं लोके न व्यतीताः पितामहाः ।।" इत्यादिशास्त्रेभ्यो ब्रह्माण्डानां तत्र तत्र तन्नियाम-कानां चतुर्मुखानां चासंखेयत्वद्दर्शनात् । नियम्यानन्दापेक्षया नियामका-नन्दः शतगुणाधिको भवतीति तत्र प्रतिपादितमिति अनन्तगुणिताधिकेभ्य-श्चतुर्मुखेभ्यः शतगुणानन्दस्य ब्रह्मणः कथनात् भगवतः साकेताधिपतेरानन्द-स्यार्थंत एवापरिच्छिन्नत्वमिति । किं बहुना यस्यानन्दस्य लेशमात्रमन्ये आनन्दाः तदानन्दस्य निरतिशयत्वे किमिव वक्तव्यमिति । विशेषत एतत्तत्व-मानन्दमयाधिकरणे द्रष्टव्यं विस्तरभयादत्र न प्रपञ्च्यते । यश्च श्रोत्रिय इत्यादि विशेषणत्रयं पूर्ववदेव व्याख्येयम् । अथैष एब परमानन्दः मनुष्या-नन्दादारभ्य शतगुणशतगुणाधिकतया प्रतिपाद्यमान आनन्दविशेष एव परमानन्दो निरतिशयः सर्वलोकोत्तरः एषः प्रदर्शित आनन्द एत्र ब्रह्मलोकः ब्रह्मणः साकेताधिपतेरानन्दः । एवं प्रकारेण याज्ञवल्क्यो हे सम्राडिति सम्बोध्योवाच प्रोवाच जनकं प्रति । स च जनको विदेहस्तद्वचनं श्रुत्वा तदुक्तं सर्वमवधार्य प्रोवाच हे भगवन् ! सोहं ज्ञाततत्त्व इवाहं भगवते

विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयाञ्चकार मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति ।।३३।।

स वा एष एतस्मिन् स्वप्नान्ते रत्वा चरित्वा दृष्ट्‌वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ।।३४।।

पूजावते गवां सहस्रं दक्षिणारूपेण ददामि प्रतिपादयामि । त्वं चात ऊर्ध्वमतः परं विमोक्षाय संसारसागरोत्तरणाय साधनविशेषं ब्रूहि कथयेति ।

(अत्र हेत्यादि) अत्र पुनः प्रश्ने याज्ञवल्क्यो ऋषिः । अयं राजा जनको मेधावी मेधातिशययुक्तो मां सर्वेभ्योऽन्येभ्यः प्रश्नेभ्य उदरौत्सीत् उपरोधं कृतवान् इत्येवं विभयांचकार भयंप्राप्तवानिवाभवत् । अयं राजा सर्वानिव प्रश्नान् प्रष्टुमुपक्रान्तो न मां कथंचिदपि त्यक्ष्यतीति भयभीत इव जात इत्यर्थं इति ।।३३।।

सम्प्रति जीवस्य जाग्रत् देशादपि उत्क्रमणं प्रतिपादयितुं स्वप्नान्तेऽवस्थापि तस्य जीवस्य बुद्धांते सञ्चरणं दर्शयितुमाह–

(स वा एष इत्यादि) यद्वा यथा जाग्रद्दशातो जीवः स्वप्नस्थाने गच्छति स्वप्नदशातो बुद्धान्ते आगच्छति तथा कदाचित् दशातः शरीर मिदं परित्यज्य देहान्तरं प्रत्यपि गच्छति इति वर्तमानदेहेऽवस्थाद्वयं दर्शयित्वा देहान्तरगमनं दर्शयितुं पातनिकामवतारयति–

(स वा एष इत्यादि) स वा एषो जीव एतस्मिन् स्वप्नान्ते स्वप्नस्थाने रत्वा चरित्वा विहरणादिकार्यं सम्पाद्य पुण्यं पुण्योपनीत स्रकचन्दनादि पापं पापोपनीतं वीभत्सभयानकादिपदार्थजातं दृष्ट्‌वा साक्षात्कृत्य पुनः पुनरपि प्रतिन्यायं यथा स्वप्नान्ते गतस्तद्विपरीतक्रमेण बुद्धान्तापप्रतियोन्याद्रवति आगतो भवतीति ।।३४।।

तद्यथा नः सुसमाहितमुत्सर्ज्जंद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढमुत्सर्जंद्याति यत्रैतदूद्ध्वोच्छ्वासी भवति ।।३५।।

कथमयं जाग्रद्देशं परित्यज्य याति तत्रानुरूपं दृष्टान्तं दर्शयन्नाह-

(तद्यथाऽन इत्यादि) यथा येन प्रकारेण अनः शकटं सुसमाहितम् सु सम्यक् समाहितम् भाण्डाद्युपकरणेन पूरितम् सत् उत्सर्जनपूर्वपूर्वदेशं परित्यजत् याति अग्रिमाग्रिमदेशं प्रति गच्छति यथा वा कश्चित् पुरुषः शिरसिन्न यस्तभारो भारं वहन्नेव पूर्वदेशेन विभागं कुर्वन् उत्तरोत्तरदेशसंयोगं कुर्वन् प्रयाति एवमेव तथैवायं शकटस्थानीयोयं पुण्यपापादिभारवान् तद्व-हनाय शारीरः शरीरे कृतावास आत्मा जीवः प्राज्ञेनात्मना परमेश्वरेण-सारथिस्थानापन्नेनान्वारूढः नियम्य नियामकात्मकसम्बन्धविशेष प्राप्य तेन प्रेरितः सन् तथोक्तं "अज्ञो जन्तुरनीशोयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा" एतादृशो जीवो भारक्रान्त ईश्वरप्रयुक्तः सन् उत्सर्जन् पूर्वशरीरं परित्यजन् याति शरीरान्तर्ग्रहणाय । पूर्वपूर्वतरदेहादिभिर्यानि यानि कर्माणि कृतवान् तत्तत्कर्म समुदायमादाय त-द्भाराक्रान्तः परमात्मप्रेरितः परमात्मदर्शितमार्गेण शरीरं पूर्वं परित्यज्य देहान्तरोपादानाय गच्छतीति भावः । कदा स जीवः पूर्वोपात्तदेहं परित्यज-न्नपरदेहग्रहणाय गच्छति तत्राह-

(यत्रैतदित्यादि) यत्र यस्यामवस्थायामयं जीवो भूम्यादौ शयान ऊर्ध्वोच्छ्वासी ऊर्ध्वश्वासवान् भवति । शरीरपरित्यागात्पूर्वमर्द्धहोराहो रात्मकं वा कालं जीवनयोनिप्रयत्नसाध्यश्वासं गृह्णाति ततश्च तदव्यव-हितोत्तरकाले शरीरमिमं त्यजति जीव इति ।।३५।।

स जीवो यदा यस्मिन् काले अणिमानं शरीरस्य कृशतां नेति प्राप्नोति । कृशत्वप्राप्तिरेव कुतस्तत्राह-

द्रवति प्राणायैव ॥३६॥

तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्प्यन्तेऽयमायात्ययमागच्छतीत्येवं हैवंविदं सर्वाणि भूतानि प्रतिकल्प्यन्त इदं ब्रह्मायातीदमागच्छतीति ॥३७॥

स्थाणुमन्येऽनुसज्जन्ति यथा कर्म यथा श्रुतम् ॥" श्व योनिं वा शूकरयोनिंवेत्यादि ॥३६॥

पुनरपि दृष्टान्तान्तरं दर्शयति–

(तद्यथा राजानमित्यादि) यथा येन प्रकारेण राजानं राज्यसिंहासनेऽभिषिक्तम् आयान्तम् । राजा आगच्छतीति श्रुत्वा तस्मिन् राष्ट्रे वर्तमानाः सर्वेपि उग्रा जातिविशेषाः क्रूरकर्माणो वा प्रत्येनसः प्रति एनसि पापकर्मणि कुत्सितकर्मणि विनियुक्तास्तस्करादिदुष्टकर्मणि विनियुक्ताः सूतग्रामण्यः सूताः वर्णसंकरविशेषाः ब्राह्मण्यां क्षत्रियात् जात इति स्मृतिप्रसिद्धाः ग्रामण्यो ग्रामनेतारो ग्रामप्रमुखाः एते सर्वे कृताभिषेकस्य राज्ञः पूर्वमेवागमनं ज्ञात्वा अन्नैर्भोज्यभक्ष्यलेह्यचोष्यादिप्रभेदभिन्नैर्विविधैर्भोग्यैः पानैर्जलदुग्धादिभिः आवसथैः कृततोरणादिशोभाविशेषविशेषितैः प्रासादादिभिः अयं राजा आयाति आगच्छतीति परस्परं कथयन्तः प्रतिकल्पंते आयान्तं राजानं निष्पन्नपदार्थैरेव प्रतीक्षां कुर्वन्ति । एवमनेनैव प्रकारेण एवं विदम् अत्र प्रस्तुनमत्र कर्मफलं तदेवात्र एवंपदेन परामृष्टं भवति एवंवित् शब्दस्तु तल्लब्धपुरुषपरकः कर्मफलवेत्तारं संसारिणम् । सर्वाणि भूतानि । एतद् भोगोपकरणलक्षणशरीरसाधनानि सर्वाणि भूतानि तत्तत्कर्मप्रयुक्तानि कर्मफलोपभोगसाधनैः सहैव इदं ब्रह्मायं जीव आयातीति आगच्छतीति कृत्वा प्रतिकल्पं ते प्रतीक्षमाणा भवन्तोभवन्ति । यदाऽयं प्रकृतशरीरं त्यजन्नेव भवति तत्समनन्तरकालमेव शरीरान्तरभोग्यभोगस्थानभोगोपकरणादीनि सर्वाण्यपि भगवतः संकल्पवशेन प्रतिपुरुषं संपूर्णानि भवन्तीति भावः । अथवा यथोक्तसंसरणप्रकारविदः

तद्यथा राजानं प्रतियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ।।३८।।

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य तृतीयं ब्राह्मणम् ।।३।।

सर्वभूतोपजीव्यत्वफलं भवतीति भावः ।।३७।।

शरीरान्तरं प्रतिजिगमिषुं जीवं सह के को गच्छन्ति तत्राह—

(तद्यथा राजानमित्यादि) तद्यथा येन प्रकारेण राजानमभिषिक्तं प्रपिपासन्तं प्रकर्षेण शरीरान्तरं प्रतिगन्तुमिच्छन्तम् उग्रा जातिविशेषा क्रूरकर्माणो वा प्रत्येनसः तस्करादिदण्डादौ विनियुक्ताः सूतग्रामण्यः सूता-वर्णसंकरविशेषा ग्रामनेतारश्च अभिसमायन्ति राज्ञां पुरः समुपस्थिता भवन्ति गच्छति राजेति जानानः एवमेवेममात्मानं शरीरनेतारं जीवं प्रति अन्तकाले मरणसमये सर्वे प्राणा वागादिप्रमुखाः अभिसमायन्ति तदाग्रे एवोधस्थिता भवन्ति गमनाय । यत्र यस्यामवस्थायामयं मरिष्यन् जीव ऊर्ध्वोच्छ्वासी ऊर्ध्वश्वासवान् भवतीति ।।३८।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये चतुर्थाध्यायस्य
तृतीयं ब्राह्मणं समाप्तम् ।।३।।

अथ चतुर्थाध्यायस्य चतुर्थः ब्राह्मणः ॥४॥

स यत्रायमात्माऽबल्यं न्येत्य सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्वव-

पूर्वपादे एभ्योऽङ्गेभ्यः समुच्यत इति कथितम् तत्र संप्रमोक्षणं नाम किमिति विस्तरेण तद्वर्णयितुमुपक्रमते—

(स यत्रायमित्यादि) सोयमात्मा देहकरणाद्युपाधिको जीवो यत्र यस्यामवस्थायाम् । आबल्यं न्येत्य । अबलस्य भाव आबल्यम् बलाभाववत्त्वम् संप्राप्य नितरां प्राप्य तदनन्तरं सम्मोहमिव न्येति प्रतिपद्यते । तत्र सम्मोहोनाम मरणायार्धसम्पत्तिमूर्छेत्यर्थः । न चेयमवस्था जागरिते समाविष्टा भवति इन्द्रियद्वारेण विषयानीक्षणात् नापि स्वप्ने संज्ञारहितत्वात्स्वप्नान्न पश्यति । न वा मरणे देहे तदानीं प्राणोष्मणो सद्भावात् । नापि सुषुप्तौ तद्वैलक्षण्यात् । सुषुप्तौ हि निमीलितनेत्रः सुप्रसन्नवदनश्च भवति अयञ्च तद्विपरीतः अतोऽर्धमरणं सम्मोहः मरणं हि सर्वप्राणवियोग सर्वप्राणवियोगोपक्रमकतिपयप्राणसम्पत्तिर्मूर्च्छा । तत्र क्वचित् कर्मशेषे विद्यमाने सति औषधादिप्रयोगेण प्राणोष्माणौ प्रत्यागच्छतः असति कर्मविशेषे तौ गच्छतः अतोऽर्धसम्पत्तिरेव मूर्छेति । एतादृश सम्मोहं प्राप्नोति । ततश्चैनं मरणोन्मुखमात्मानं जीवम् । एते प्राणा वागादयोऽभिसमायन्ति जीवम्यातिसमीपमागच्छन्तीति । स मरणोन्मुखो जीव एता तेजोमात्राः प्रकाशकांशका वागादीन्द्रियाणि । समभ्याददानाः सम्यक् गृह्णन् । यद्यपि स्वप्नसमयेपि जीव इन्द्रयाणां ग्रहणं करोति तथापि तत्र सम्यग् न भवति ।

(इह तु सवासनमिन्द्रियग्रहणमिति) सर्वाण्येवेन्द्रियाणि समादाय जीवो हृदयं पुण्डरीकाकारमेवान्ववक्रामति । अन्वागच्छति । इन्द्रियग्राम-

क्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते तथा रूपज्ञो भवति ॥१॥

एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकी-

सहितो हृदये एवावतिष्ठते इत्यर्थः । स चाक्षुषः चक्षुषि सन्निहितः चाक्षुषो म्रियमाणो जीवः स एष पुरुषो यत्र यस्मिन्काले पराक् रूपादिविषय-परांमुखो भूत्वा हृदयदेशे पर्यावर्ततेऽवतिष्ठते । अथ तदनन्तरकालेऽयं जीवो रूपज्ञो भवति रूपज्ञानरहितो भवति ॥१॥

(एकीभवति) स्वप्नकाल इवेन्द्रियैः सहैकीभवति तस्मिन् समये नायं पश्यतीति तत्समीपवर्तिनो लोका आहुः कथयन्तीति । एवं यदा स पुरुषो विषयेभ्यः परावृत्तो भवति तदा इन्द्रियैः सहैकीभवतीति पार्श्वस्था एवं कथयन्ति यदयं न जिघ्रति न रसयते न विजानातीति ।

(तस्य हैतस्येत्यादि) ततः तस्य हैतस्य मरणासन्नपुरुषस्य यत् हृदयं तस्याग्रेऽग्रभागे प्रद्योतते प्रकाशमानं भवति । हृदयस्याग्रं नाडीमुखं यदादाय निर्गच्छति तत् नाडीमुखं संहृतेन्द्रियलक्षणकरणतेजसा प्रकाश-युक्तं भवति । तेन प्रद्योतनेन प्रकाशेन प्रकाशितद्वार एष आत्मा म्रियमाण-पुरुषः निष्क्रामति निर्गच्छति शरीरात् विनिर्गतो भवति । केन द्वारेण स निर्गच्छति तत्राह–

(चक्षुष इत्यादि) चक्षुषः चक्षुर्द्वारेण शरीरं परित्यजति । कदाचित् मूर्ध्नो वा मूर्धप्रदेशात् निर्गतो भवति कदाचित् अन्येभ्यो वा शरीर प्रदेशेभ्यः शरीरे नवद्वाराणि सन्ति तत्रादृष्टबलात् जीवस्तत्तद्द्वारेण यथोक्त-प्रकाशप्रकाशितेन याति यथाकर्म यथाश्रुतं तत्तद्योनिप्राप्तये इतिभावः । तं शरीरकरणाध्यक्षं जीवमुत्क्रामन्तं निर्गच्छन्तं शरीराद्बहिरेकान्ततया यान्तं

भवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो

प्राणो मुख्यप्राणो राज्ञो मंत्रीव अनूत्क्रामति। अनु पश्चात् शरीराद्बहिर्याति। ततः प्राणं मुख्यप्राणमुत्क्रामन्तं जीवानुगच्छन्त सर्वे प्राणास्तदधीनवृत्तिका वागादयस्तदनु सर्वे अनुत्क्रामन्ति। यदा खलु जीवः शरीरं परित्यज्य गच्छति तदा तदधीनवृत्तिको मुख्यप्राणस्तदनुयाति मुख्यप्राणगमनसमये एव तदधीनवृत्तिका वागादयोपि गच्छन्ति राजामात्यभृत्यवदिति।

(स विज्ञान इत्यादि) तस्मिन् गमनसमये समुत्क्रामन् जीवः स विज्ञानवान् भवति। "यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरम्। तं तमेवेति कौन्तेय सदा तद्भावभावितः" इति स्मृतेः तत्समये यत्र स जीवो याति तादृशस्थानविषयकज्ञानवानेव भवति तद्विषयकस्मृतिमान् भवतीत्यर्थः। यदेतज्ज्ञानमुत्क्रामतो भवति तत्कर्माधीनं न तु स्वप्रयत्नाधीनम्। स्मृतौ योगिनामेव तादृशज्ञानस्य स्वप्रयत्नसाध्यत्वप्रतिपादनात्। स विज्ञानमेव तादृशविज्ञानयुक्तमेव जीवं प्राणसमुदायोऽनुअवक्रामति अनुगच्छति राजानं तदनुगामिन इवेति।

(तं विद्याकर्मणीत्यादि) तं पूर्वोक्तपुरुषं विद्याकर्मपूर्वप्रज्ञा च विद्याकर्मपूर्वजन्मसम्बन्धिवासना च समन्वारभेते। समनुगता भवति। विद्यादिना विशिष्ट एव जीवः परलोकयात्रां निरवर्तयति नहि पूर्ववासनामन्तरेण कश्चिदपि किंचित्कर्तुं भोक्तुं वा शक्नोति नहि अननुभूतेविषये कारणानां कुशलता सम्भवति। दृश्यते च क्वचित्पूर्वजन्मानुभूत वासना बलात् एतत् जन्मनि अभ्यासं विनैव क्रियाविशेषेषु समीचीनं कौशल्यम्। केषांचित् अति सरलेष्वपि कार्येषु अपांडित्यम्। जातमात्र एवाखुर्दन्तैरतिकठिनमपि पर्वतायं कृन्तति नान्यस्तथाकर्तुं शक्नोति। यथा

वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति स विज्ञानो भवति स विज्ञानमेवान्ववक्रामति तं विद्याकर्म्मणी समन्वारभेते पूर्व्वप्रज्ञा च ।।२।।

तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याऽविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति ।।३।।

तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं

कश्चित् अपक्वमता येन वैराग्ययुक्तो भवति कश्चित्परिपक्वोपि न तत्र मतिं विदधाति तदेतत्सर्वं पूर्ववासनाया उद्भवानुद्भवकारणकमेवेति । तस्मात् वद्याकर्म पूर्ववासनेति त्रितयमपि शकटसम्भारस्थानापन्नम् परलोकयात्रापाथेयमादायैव जीवः प्रकृतदेहं परित्यज्य देहान्तरप्राप्तये यात्रां करोतीति ।।२।।

(तद्यथेत्यादि) यथा येन प्रकारेण तृणजलायुका तृणेऽवस्थिता जलूका प्राणिविशेषलक्षणा तृणेपरिचरन्ती एकस्य तृणस्य अन्तमग्रभागं गत्वा प्राप्य अन्यं यत्र स्थिता तदन्यं तृणान्तरम् आक्रमं स्थानमक्रम्य तृणान्तरलक्षणमाश्रयं प्राप्य आत्मानं स्वशरीरस्य पश्चिमावयवमुपसंहरति पूर्वतृणस्थानादाकर्षति । यथा जलायुका पूर्वतृणमपरित्यजन्ती परं तृणं प्राप्यैव पूर्वं तृणं त्यजन्तीत्यर्थः तथैव तेनैव प्रकारेण अयमात्मा म्रियमाण जीवः इदं वर्तमानं शरीरं भोगायतनम् निहत्याविद्यां गमयित्वा पूर्वशरीरं निश्चेष्टतामापाद्य अन्यं शरीरान्तरलक्षणमाक्रमं स्थानं भोगायतनमाक्रम्य गृहीत्वा आत्मानं पूर्वशरीरात् उपसंहरति । नवीनं भोगायतनमधिष्ठायैव प्राक्तनं शरीरं जीर्णमजीर्णं वा परित्यजतीत्यर्थः ।।३।।

अथायं जीव यदिदं नवतरं शरीरान्तरं करोति तत्पूर्वोपात्तमेव देहो-

रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्याऽविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं

पादानमादाय तदुपपादय सुवर्णकारादिवत् देहान्तरं करोति । अथवा नवीनतरमुपादानद्रव्यमादाय तद्द्वारा शरीरान्तरं करोति तत्राह–

(तद्यथा पेशस्कारीत्यादि) तद्यथा पेशस्कारी तत्र पेशः सुवर्णं तत्करोति इति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामेकावयवमुपादाय गृहीत्वा कल्याणतरमभिनवत्रवत् विलक्षणं मनोहरं रूपमलंकारादिकं कुरुते सम्पादयति । एवमेव तेनैव प्रकारेणायमात्मा जीव इदं पूर्वावस्थं शरीरं निहत्याविद्यां गमयित्वा निश्चेष्टतामापाद्य तदंशमेवादाय अन्यत्ततो भिन्नमिव कल्याणतरं नवीनं रूपं शरीरं कुरुते सम्पादयति । अथवा यथा पेशस्कारी कोशजन्तुः पट्टतन्तो अभिशं गृहीत्वा नवीनं पट्टवस्त्रान्तरं करोति तथैव जीवोपि करोति । नवीनतरमिव जायमानं तत् शरीरं किमाकारकं तत्राह–

(पित्र्यं वेत्यादि) पित्र्यं पितृभ्यो हि तं कर्मबलाद्यत् शरीरमादायायं जीवः पितृलोकसुखमनुभवति । गान्धर्वं वा गन्धर्वलोकोपभोग योग्यम् दैवं वा देवलोकभोगाययोग्यं प्राजापत्यं वा प्रजापतिभोगयोग्यम् । ब्राह्मं वा चतुर्मुखलोकभोगयोग्यम् । अन्येषां वा भूतानां कर्मबलात् तिर्य्यग्वनस्पतिप्रभृतीनां सम्बन्धि नवतरं शरीरं करोति । अयमाशयः यदयं शरीरान्तरं सम्पादयति न तत्रापूर्वमुपादानमादाय किन्तु पूर्वशरीरोपादानमेव गृहीत्वा सुवर्णकारो यथा पूर्वनिर्मितालंकारसम्बन्धि सुवर्णमात्रादायैव नवीनमलंकारं सृजति तद्वदयं जीवोपि करोति । यदत्र शरीरान्तरं प्रति कर्तृत्वं जीवस्य न तत् साक्षात् किन्तु कर्मद्वारेणैव कर्तृत्वम् । भोगायतनमन्तरेण चिदात्मकस्य कर्तृत्वासम्भवात् पूर्व-

वा ब्राह्मं वाऽन्येषां वा भूतानाम् ।।४।।

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्म्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदम्मयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः

भोगायतनस्य तदानीमतीतत्वात् । किन्तु शुभाशुभपूर्वभवोपार्जितकर्मणैवेति तदुक्तं "कर्मणाऽजनयत् पितेति ।।४।।

(स वा अयमित्यादि) सोयं विज्ञानमय आत्मा जीवः ब्रह्मैव ब्रह्मगुणेनापहतपाप्मत्वादिनायुक्तोपि सन् मनोमयो मनउपकरणकः अयं जीवो मन उपाकारकमादाय सुखदुःखादिकं गृह्णाति । तत उपकरणोपकरणि लक्षण सम्बन्धमादाय मनः प्रचुरः अन्नमयो यज्ञ इतिवत् । एवं प्राणमयः प्राणोपकरणकः चक्षुर्मयश्चक्षूपकरणकः श्रोत्रमयः श्रोत्रोपकरण इत्यादि तेजोमयस्तेजः प्रचुरः अतेजोमयस्तेजोभिन्नमहदहंकारादिमयः यतश्चतुर्विंशतितत्वप्रधानत्वात् शरीरस्येति । काममयः काम इच्छा तन्मयः अकाममयः कासव्यतिरिक्तसंकल्पश्रद्धादिमय इति । क्रोधमयोऽक्रोधमयः प्रीतिमय इत्यर्थः सर्वमयः । तदेतत् सोयं जीव इदं मयोऽदोमय । इहलोक परलोकमय इति ।

(यथाकारीत्यादि) यथा शास्त्रानतिक्रमेण कर्मकर्तुं शीलं यस्य स यथाकारी । यथाचारी । यथाशास्त्रमर्यादयाचरितुं शीलमस्य स यथाचारी । तत्र कमाग्निहोत्रादिकम् । चरणं सन्ध्यावन्दनादि नित्यं नैमित्तिकम् । अर्थात् यादृशं कर्मचरणं वा करोति स तथा भवति तस्य तस्य कर्मणोनुरूपं फलं प्राप्नोति । एतदेव विस्तरतो दर्शयति–

(साधुकारी इत्यादि) यो हि व्यक्तिविशेषः साधुकर्म सत्कर्म

पुण्येन कर्म्मणा भवति पापः पापेन ॥ अथो खल्वाहुः काममय

करोति । यो हि शास्त्रोक्ताग्निहोत्रसत्यतपस्यादिकं यथासमयं यथादेशं करोति स साधुर्भवति जन्मान्तरे ब्राह्मणदेवादिपुण्यमयं जीवनमासादयति । यस्तु पापकारी पापकर्म ब्रह्मणहत्याकलञ्जभक्षणादिकं शास्त्रप्रतिषिद्धं कार्यं करोति स पापो भवति पापयोनिं श्वशूकरादिकं प्राप्नोति । सत्कर्मकारी ब्राह्मणादिकशुभशरीरयुक्तो भवति पापकर्मकारी च चाण्डालादिशरीरयुक्तो भवतीति भावः । वर्तमानशरीरे विद्यमानो जीवो यत् सत्कर्म करोति असत्कर्म वा करोति तत्रापि पूर्वभवोपार्जितपुण्यपापे एव कारणे भवतः तद्बलादेवेदानीं पुण्यं वा पापं वा आचरति । अयमाशयः पुण्यं द्विप्रकारकं भवति । पुण्यानुबन्धिपुण्यं पापानुबन्धिपुण्यं च । तत्र यथा कश्चित् पुण्यफलं सुखमनुभवन् सत्कर्म एवाचरति एतत्पुण्यं पुण्यान्तरजनकं भवति तत्पुण्यानुबन्धिपुण्यमिति गीयते । यत्र पुण्यफलमनुभवन् मद्यमांसाद्यसत्कर्म करोति तेन भविष्यत्काले पापमेव भविष्यतीति तत्पुण्यं पापानुबन्धि इति गीयते । एवं पापमपि द्विविधं भवति पुण्यानुबन्धिपापं पापानुबन्धिपापं चेति तदिहवार्तमानिकपुण्यपापं प्रति प्राक्कालिकपुण्यपापे हेतू भवत इति ।

(अथो खल्वाहुरित्यादि) प्रकृते अथ शब्दः प्रकृतपक्षव्यतिरिक्तपक्षान्तरप्रदर्शनार्थकः । खल्वाहुरेके केचन शास्त्रमर्मज्ञा एवं वक्ष्यमाणप्रकारेणाहुः कथयन्ति । किं ते कथयन्ति तत्राह—

(काममय इत्यादि) अयं पुरुषः काममय एव कामप्रयुक्त एव शुभाशुभकर्माणि करोति । यद्यपि शरीरग्रहणे पुण्यपापे पूर्वभवोपाते कारणं भवतीति निश्चयस्तथापि कामना प्रयुक्त एव पुरुषः पुण्यपापयोरर्जने समाहितो भवति । ततश्च काम एव सर्वस्य संसारस्य मूलं कारणम् ।

एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते ॥५॥

तदेष श्लोको भवति ।। तदेव सक्तः सह कर्म्मणैति लिङ्गं

तदुक्तं "कामान् यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्रेति" श्रुतिराथर्वणीः अकामस्य क्रियाकाचिद्दृश्यते नेह कर्हिचित् । "यद् यद्धि कुरुते किंचित् तत्तत्कामस्य चेष्टितमिति" मनुः । तस्मादयं पुरुषः काममय एव । स काममयः पुरुषो यथा कामो यादृशकामनावान् भवति स तत्क्रतुर्भवति तादृशाध्यवसायवान् भवति । यत्क्रतुर्यादृशाध्यवसायवान् भवति तत्कर्म कुरुते यथाध्यवसायं कर्म शुभमशुभं वा चिनोति । ततश्च यत्कर्म कुरुते तदभिसम्पद्यते । अध्यवासितः पुरुषो यादृशहीनमहीनं वा कर्मानुष्ठानं करोति तादृशकर्मानुरूपं तत्फलं शुभाशुभयोर्नि प्राप्य यथा योग्यं सुखं दुःखं वा प्राप्नोति तत्तत्कर्मफलमवश्यमेवानुभवति । तत्कर्म यावत्फलं नोत्पादयति तावत्पर्यन्तमवतिष्ठते एवेति । तदुक्तं "कदाचित्स्वकृतं कर्म कूटस्थमिवतिष्ठति । मज्जमानस्य संसारे भावद्दुःखातिगो भवे" दित्यतः पुरुषः काममयः कामैव संसारस्य मूलं कारणमिति ।

(तदेष इत्यादि) तदेतस्मिन्प्रकृतविषये एषः वक्ष्यमाणः श्लोको भवति ।

(तदेवेत्यादि) लिंगलीनं जन्मसहस्रादपि जीवे विद्यमानं परोक्षमिव कर्मलक्षणार्थं गमयति यापयति फलानुभवकाले तत्सत्तां बोधयतीति लिंगं व्यापकं कारणं तादृशं मनो जीवस्य जीवनयात्रानिर्वाहे प्रधानामात्य इव व्यवस्थितम् । यत्र फले निषक्तं निविष्टं भवति तदेव तत्फलमेव तदारम्भकं कर्मणा शुभाशुभेन सह देहावसानसमयेपि सक्तोनुबिद्धः सन् एति प्राप्नोति एष श्लोको भवतीति पूर्वेणान्वयः । प्रकृतं कर्मोपसंहरन्नाह-

मनो यत्र निषक्तमस्य ॥ प्राप्यान्तं कर्म्मणस्तस्य यत्किञ्चेह करोत्ययं ॥ तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्म्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्म-

(प्राप्यान्तमित्यादि) इहास्मिन्कर्मयोग्यलोके यत्किंचित्कर्म सोमयागादिकं तत्तत्फलोद्देशेन करोति फलकामनया तस्य यागादिजन्यस्य शुभाशुभकर्मणोऽन्तं फलभोगेन समाप्तिं कृत्वा कर्मफलं सर्वं भुक्त्वा तस्माल्लोकात् यत्र फलभोगाय गत आसीत् तस्माल्लोकात् कृत्स्नकर्मफलभोगानन्तरम् अस्मै लोकाय पुनः पुनरपि एति आगच्छति, किमर्थमागच्छति तत्राह—

(कर्मणे इति) पुनरपि अपरमपरं कर्म कर्तुमागच्छति । क आगच्छति तत्राह इति नु कामयमानः पुनः कामनाविशिष्टः कर्मसम्पादनाय पुनः पुनः संसरतीति । यथोक्तप्रकारेणाविद्वद्विषयकं संसारं विस्तरत उपवर्ण्य ब्रह्मज्ञानिनोऽविद्वदपेक्षया वैलक्ष्यण्यं दर्शयितुमुपक्रमते

(अथाकामयमान इत्यादि) अथ अनन्तरम् संसारस्वरूपदर्शनेन कामनामूलत्वं ज्ञात्वा ततो जातवैराग्यानन्तरम् अकामयमानः कामनारहितो वीतराग इत्यर्थः यो अकामः कामनाशून्यः कुत एतस्य कामनाराहित्यं तत्राह निष्कामः निर्गताः कामा यस्मात् स निष्कामः । आप्तकामः पूर्वावस्थितकामानां निर्गमनात् आप्तकामत्वं सम्भवति । तत्राप्तः प्राप्तः कामो येन स आप्तकामः आप्तकामत्वमस्य कथं भवति तत्राह आत्मकामः आत्मैव कामो यस्य स आत्मकामः आत्मातिरिक्तकामस्य वस्तुतोऽभावेनात्मलक्षणकामस्य स्वस्वरूपस्य नित्यप्राप्तत्वात् आप्तकामत्वम् भवति । अत एवाकामत्वमपि यत आत्मव्यतिरिक्तकामनाया अभावात् । एतादृशस्य पुरुषश्रेष्ठस्य प्राणा नोत्क्रामन्ति शरीराद्विनिर्गत्य पुनः संसारप्राप्तये न

कामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति ।।६।।

तदेष श्लोको भवति ।। यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य

भवन्ति किन्तु एतादृशं वस्तु ब्रह्मैव सन् ब्रह्माप्येति ब्रह्मणि लीनो भवति यस्य ब्रह्मणि न लयः तस्य प्राणा उत्क्रमित्वा संसारगतये पुनः पुनः प्रभवन्ति यस्तु ब्रह्मणि लीनो भवति तस्य प्राणा उत्क्रमणाय न भवन्ति । तत्र ब्रह्मैव सन् आविर्भूत ब्रह्मस्वरूपसन् जीवो ब्रह्मणि परब्रह्मणि लीनो जायते । यद्यपि इण्धातुः सामान्यतो गत्यर्थकस्तथापि प्रकृते तादृशार्थस्य प्रकरणा संस्पर्शित्वात् लयार्थक एव स्वीक्रियते । तत्र लयो नाम ब्रह्मव्यतिरिक्ततया ब्रह्मपार्थक्येन स्वातन्त्र्येणेति यावत् जीवस्य दर्शनाभावः अपहतपापमत्वादिको यो ब्रह्मगुणः तद्गुणसादृश्येन परमब्रह्मभिन्नत्वेन रूपेण दर्शनयोग्यत्वस्याभावो भवतीति । यद्यपि न तस्य प्राणा-उत्क्रामन्तीति कथनं नोपपद्यते । यो हि ब्रह्मोपसन्नस्तस्यैवापहतपाप्मत्वादिब्राह्मस्वरूपाविर्भावो भवति नान्यस्य । परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिसम्पद्यते इत्यादि श्रुत्यन्तरश्रवणेन देशविशेषविशिष्टब्रह्मप्राप्तिः देशविशेषेऽर्चिरादि मार्गे मन्तरा न सम्भवति । तादृशार्चिरादिगतिश्च सूक्ष्मभूतप्राणादियुक्तस्य प्राणादियोगश्च कर्मप्रयोज्यः । यस्तु कर्मरहितस्य तस्य शरीरेन्द्रियप्राणसम्बन्धाभावेन ब्रह्मैव सन् ब्रह्माप्येतीति नोपयुज्यते । तथापि "समानाचासृत्युपक्रमादमृतत्वं चानुपोष्य" इत्यादि ब्रह्मसूत्रेषु विदुषोपि नाडी विशेषोत्क्रमणाश्रवणदुत्क्रान्तिरवर्जनीयैवेति समाहितत्वात् । विशेषत एतत्तत्वं तत्रैव दृष्टव्यमिति ।।६।।

तदेष श्लोको भवति । तत्तत्र ब्रह्मविद् विषये एषो वक्ष्यमाणः श्लोको भवति तद्यथा—

(यदा सर्वे प्रमुच्यन्ते इत्यादि) यदा यस्मिन्काले अस्योपासकस्य हृदि

हृदि श्रिताः ।। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ।। यद्यथाहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते

हृदये श्रिता आश्रिता विद्यमाना इत्यर्थः कामाः सांसारिकविषाक्तविषयका मनोरथाः सर्वेनत्वेकोद्वौ वा किन्तु समस्तास्ते प्रमुच्यन्ते शान्ता उपरता भवन्ति । अथ तदनन्तरं कामोपरमानन्तरमेव मर्त्यो मरणधर्मापि उपासको मृतो भवति पूर्वकालिकोत्तरकालिकपापाभ्यां रहितो असम्बद्धश्च भवति पापसम्बन्धशून्यो भवतीत्यर्थः । अत्र ब्रह्मोपासनसमये एव ब्रह्म समश्नुते ब्रह्मणोऽनुभवं करोति । अहं ब्रह्मावयव इत्येवमनुभवमाप्नोतीति ।

(तद्यथाऽहि निर्ल्वयनीत्यादि) यथा येन प्रकारेण अहि निर्ल्वयनी । अहेः सर्पस्य निर्ल्वयनी जीर्णा त्वक् निर्मोक इति यावत् । वल्मीके सर्पनिवासस्थलविशेषे तद्बिले इत्यर्थः प्रत्यस्ता सर्पेण विसृष्टा परित्यक्ता सर्पाऽसम्बद्धा । मृता मृतवदवस्थिता निष्प्राणेत्यर्थः इत्थं भूतापि जीर्णा सर्पत्वक् दूरात् दर्शकानां सर्पाकारेण ज्ञायमाना शयीत स्थिता भवति । एवमेवेत्थमेव । इदं ज्ञातब्रह्मण उपासकस्य शरीरम् इदं ममेत्याभिमानरहिततया परित्त्यक्तमपि । अन्येषां दर्शकानामिदं ब्रह्मविद् स्वशरीरमित्थंरूपेणावभासमान शेतेऽवस्थितं भवति । यथा जीर्णा सर्पत्वक् सर्पासम्बद्धापि यत्र क्वचन स्थिता दर्शकानामयं सर्प इति भयमुत्पादयन्तीवावतिष्ठते तथा ब्रह्मविदः शरीरं ममेदं शरीरमित्याभिमानरहित मपि बद्धानां जीवानामिदं ब्रह्मविदः शरीरमित्यवभासमानमवतिष्ठतेति भावः ।

(अथायमित्यादि) अथ अप्यय दर्शनसमानाकार ब्रह्मविद्यागमोत्तरकालानन्तरम् अयमुपासकः स्वतोऽमृतः मरणधर्मरहितोपि । अशरीरः मरणात्पूर्वमशरीरकल्प एव । शरीरसम्बन्धि निन्दादिजनितहर्षविषादादिराहित्यात् प्राणो ब्रह्मैव गाणादिसम्बन्धित्वेपि तात्विक-

अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ।।७।।

तदेते श्लोका भवन्ति ।। अणुः पन्था विततः पुराणो मांस्पृ-

ब्रह्मानुभवयुक्तत्वात् । प्रादुर्भूतब्रह्मलक्षण इव व्यवस्थितः तेज एव । अज्ञानस्वरूपान्धकारस्य विरोधी एव । यथा शार्वर तमोविरोधी सौर्यंतेजस्त-द्वदेवेति । यथोक्तप्रकारेण याज्ञवल्क्यात् ब्रह्मविद्यां प्राप्य जनकः प्राह–

(सोहं भगवते इत्यादि) वैदेहः खलु जनको राजा ब्रह्मविद्या-प्राप्त्यनन्तरं प्रीतमनाः सन् याज्ञवल्क्यं प्रति प्रोवाच । हे भगवन् भगवते पूजावते तुभ्यं दक्षिणारूपेण गवां सहस्रं ददामि प्रयच्छामीति ।।७।।

तदेते श्लोका भवन्ति तदत्र विषये वक्ष्यमाणा एते श्लोका भवन्ति । के ते श्लोकास्तत्राह–

(अणुः पन्था इत्यादि) अणुर्दुर्विज्ञानः शब्देतरप्रमाणेन प्रत्यक्षा-दिना ज्ञातुमयोग्यः विततो विस्तृतवेदान्तप्रस्थाने तत्तत्स्थलेषु महता परि-करेण प्रतिपादितः पुराणोऽनादिकालात् आगतः पन्थाः अर्चिरादिमार्गः मां स्पृष्टो मां प्राप्तः शतसंख्यकनाडीद्वारेण स्वदेहस्पर्शीति । यद्वा पूर्वप्रति-पादितोऽर्चिरादिमार्गो मया प्राप्तः तद्विषयकज्ञानवानहमभवमित्यर्थः । तथा यथोक्तोऽर्चिरादिमार्गो मया जनकेनैवानुवित्तोऽनुभूतः यद्यप्ययं मार्गो अन्येनापि ज्ञात एव संसारस्य ज्ञातुश्चानादित्वात तथापि ते शरीर-विमोक्षणा नन्तरमेव ज्ञातवान् किन्तु भोगदशायां मयैव वै देहेनैवज्ञातोऽयम-र्चिरादिमार्गः योयमर्चिरादिमार्गो ब्रह्मलोकप्रापकः तेनार्चिरादिमार्गेण धीराः परमेश्वरप्रसादात् विलक्षणप्रज्ञावन्तो ब्रह्मविदः इतो विद्यमान विद्या-धिकारिशरीरात् विमुक्ता मुच्यमानाः सर्वेभ्यो लोकेभ्यश्च । ऊर्ध्वमुपरीव विद्यमानं स्वर्गं स्वर्गवत् परमप्रियं लोके भगवतः साकेताधिपतेर्लोकम् अत्र

ष्टोऽनुवित्तो मयैव ।। तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ।।८।।

तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितञ्च ।। एष

स्वर्गशब्दो भगवल्लोकपरक इति बहव आचार्याः कथयन्ति । वयं तु न स्वर्गलोकशब्दोऽन्यार्थकः किन्तु स्वार्थप्रतिपादकः तदर्थश्च "यन्न दुःखेन सम्भिन्नं नचातस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वः पदास्पद" मित्यादिना स्वर्गस्य परमप्रियत्वेन लोके प्रसिद्धत्वात् स्वर्गवत् भगवल्लोकस्य परमप्रियत्वं प्रतिपादितम् । यद्यपि स्वर्गादधिको भगवल्लोकस्तथापि इषुरिव सविता धावतीतिवत् द्रष्टव्यम् । अतएव "स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिण" इत्यादि स्थले स्वर्गतुल्ययोरपवर्गयोरित्यर्थः कृतः लोकप्रसिद्ध्यनुसारात् । एतादृशं भगवल्लोकं ते मार्गविदोऽपियन्ति प्राप्नुवन्ति । अनेन मार्गप्रशंसा कृता भवति । एतादृशो हि मार्गो यो ब्रह्मज्ञानिनामपि उपकरोति इति ।।८।।

पुनरपि तमेव मार्गं प्रशंसयन्नाह

(तस्मिन्नित्यादि) तस्मिन् अर्चिरादिके ब्रह्ममार्गे शुक्लं नीलं पिंगलं हरितं लोहितं च विद्यते इति प्राचीना आहुः कथयन्ति तथा च श्रुत्यन्तरम् "असौ वा आदित्यः पिंगल एष शुक्ल एष नील एष पीत एष लोहितः" इति । एष पन्था अर्चिरादिमार्गः ब्रह्मणाह अनुवित्तः ब्रह्मसंबद्धः ब्रह्ममार्ग इत्यर्थः इयमेव मार्गमधिरुह्य गच्छति ब्रह्मलोकमतोयं ब्रह्मसंबद्धो ब्रह्ममार्ग इति । तेन ब्रह्ममार्गेणार्चिरादिना । पुण्यकृत पुण्यं शास्त्रविहितं कर्म पूर्वं सम्पाद्य तेन पुण्यकर्मणा पापविनाशानन्तरं शुद्धान्तःकरणः ब्रह्मवित् ब्रह्मज्ञानवान् । तैजसश्च तेजःसम्बन्धी तेजस उपासक इत्यर्थः पंचाग्निविद्यानिरत इति । "तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धातप इत्युपास्ते" इति

पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥९॥

अन्धं तमः प्रविशन्ति येऽविद्यानुपासते ।। ततो भूय इव ते

छान्दोग्ये अर्चिरादिमार्गशीलकानां ब्रह्मज्ञानिनां चार्चिरादिमार्गेण गमनश्रवणादिति ॥९॥

नवममन्त्रे ब्रह्मवित् पुण्यकृदिति कथितं तत्र कर्मांगज्ञानस्य ब्रह्मप्राप्तौ कारणतां स्पष्टयन्नाह

(अन्धन्तम इत्यादि) ये अनुष्ठातारः अविद्यां केवलं कर्म उपासते अनुतिष्ठन्ति स्वर्गादिफलमुद्दिश्यैव कर्मणामग्निहोत्रादीनामनुष्ठानं कुर्वन्ति न तु ब्रह्मज्ञानार्थितया कर्मानुष्ठानं कुर्वन्ति । ते इत्थंभूताः कर्मोपासकाः अन्धमतिनिविडं तत्त्वज्ञानमन्तरेणाशक्यानुच्छेद्यम तमः संसारलक्षणमन्धकारवत् विवेकाजनकमन्धकारम् प्रविशन्ति प्रतिपद्यन्ते । तत्तत्फलोद्देशेन कर्म कृत्वा परलोकमवाप्य तत्फलमुपभुज्य तदवसाने पुनरिमं लोकमागत्य तत्तत्फलाय पुनरपि कर्म कुर्वाणा घटीयन्त्रन्यायेन संसारमहोदधौ निमग्ना भवन्तो न कदाचिदपि संसारविमुक्ता भवन्ति अतोऽधतमस्येव तेषां प्रवेश इति भावः । उपासका य उ ये तु विद्यायां केवलविद्यायामेव रताः नित्य नैमित्तिकं कर्म परित्यज्य विद्यायामेवकर्मत्यजन्ति । ते उपासकाः परित्यक्तकर्माणः "मोहात्तस्य परित्यागस्तामसः परिकीर्तितः" इति भगवदुक्तेः तामसत्यागत्यागवत्वात् । ततो भूय इव पूर्वापेक्षयाऽधिकतरमितमोन्धकारं प्रतिपद्यंते फललेशमप्यनुवाप्य पतिता भवन्ति । वैराग्याभावाद् । ज्ञानोपाये आलस्यादप्रवर्तमाना नित्यनैमित्तिककर्माणि परित्यजन्तोऽर्हनिशमुपचीयमाना धर्माणोत्यधोर्गति गच्छन्ति तस्मात्केवल कर्माराधकापेक्षया केवलविद्योपासका अतिशयेनाधमा इति । केचनामुमेव मंत्रं दृष्ट्वा ज्ञानकर्मणो समुच्चय इति मन्यन्ते तेतु अतीवभ्रान्ताः यतो मोक्षं प्रति ज्ञानव्यतिरिक्त-

तमो य उ विद्यायां रताः ।।१०।।

अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः ।। तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः ।।११।।

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।। किमिच्छन् कस्य

स्योपायत्वनिराकरणपरक वचनैर्विरोधात् । यदि ज्ञानकर्मणोः समुच्चयः श्रुत्यभिमतो भवेत् तदा 'नान्यः पन्था विद्यतेऽयनाये'त्यादिना ज्ञानेतरकारणता निराकरण सर्वथैवासमंजसमापद्येत । एवं ज्ञानस्य मोक्षोपायत्वयप्रतिपादक वचनैरनेकैर्विरोधः प्रसज्येत । एवं कर्मणां ज्ञानांगत्वप्रतिपादकवचनैरपि विरोधः स्यादतो न ज्ञानकर्मणोः समुच्चय इति ।।१०।।

ननु भवतु अविद्योपासकानामन्धतमसि प्रक्षेपस्तावता किं स्यादित्या शंकायामाह–

(अनन्दा नाम ते इत्यादि) अनन्दा आनन्दलेशरहिता । न विद्यते आनन्दः सुखं यत्र तादृशः सुखसामान्याभाववन्तएतन्नामकाः केचन लोका लोकविशेषाः सन्ति । ये खलु अन्धेन निविडेन तमसान्धकारेणावृता आच्छादिताः सुखन्तु नास्त्येव प्रत्युत दुःखेनोतप्रोता तान् लोकान् ते इतः प्रेत्य मृत्वा शरीरत्यागान्तरमभिगच्छन्ति प्राप्नुवन्ति । के गच्छन्ति तान्-लोकान् तत्राह ये अविद्वांसो ब्रह्मज्ञानरहिताः । तथा येऽबुधः प्रत्यगात्मविद्याविकलाः पंचाग्निविद्याविरहिताः अत्र बुध इति प्रथमा बहुनस्य रूपं ननु अकारान्तबुधशब्दस्य प्रथमैकवचनम् । बुध्यते इति बुत् । बुध धातोः क्विप् प्रत्यये सति बुधिति ततः प्रथमा बहुवचनम् । एकमानन्दरहितं दुःखातिशययुतं भोगस्थानं विद्यते यत् स्थानं ब्रह्मज्ञान-विहीनः केवलकर्मोपासकः पुरुषः प्राप्नोति प्राप्य चातीवदुःखीभवतीत्येतदेव महत्क्षतिकरमिति ।।११।।

(आत्मानं चेदित्यादि) यः खलु विद्यमानेभ्योऽप्यैहिकामुष्मिक-

कामाय शरीरमनुसञ्ज्वरेत् ॥१२॥

यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्सन्देह्ये गहने प्रविष्टः।
स विश्वकृत्स हि सर्व्वस्य कर्त्ता तस्य लोकः स उ लोक एव ॥१३॥

सकलोत्तमाधम पदार्थजातेभ्यो वितृष्णो भगवतः साकेताधिपतेरहेतुकभक्तिमात्रे संलग्न उपासकविशेषः पुरुष । आत्मानं स्वकीयशरीरेन्द्रियाध्यक्षं स्वात्मानमेतादृशोऽहमस्मि शरीरेन्द्रियमनःप्राणबुद्धिभ्यो जडेभ्योऽतिशयेन विलक्षणः किंबहुना ब्रह्मैवाहमस्मीति विजानीयात् विशेषतो ज्ञानवान्भवेत् । तदा किमिच्छन् शरीरेन्द्रियादिसमस्तभोगयोग्येषु लौकिकपारलौकिकविषजातेषु स्पृहाया अभावेन स्वबन्धुभूतकलत्रपुत्रमित्रादेरपि अभिमानराहित्येनाभावात् स्वस्य किमिच्छन् कीदृशं फलविशेषमिच्छन् कस्य वा कामाय कस्य सम्बन्धिनोऽभीप्राय शरीरमनुसंज्वरेत् शरीरं तप्यमानं सत् तदनु स्वयमपि कथं तापयुक्तो भवेत् । शरीराद्यनुबन्धिफलमुद्दिश्य कथमनुतापयुक्तो भवेत् । यदा शरीराद्यतिसमीपवर्ति वस्तुष्वपि संजातवैराग्यस्तदा किमर्थं स शरीरादिसम्बन्धितापेनानुतप्तो भवेदिति भावः ॥१२॥

पुनरपि प्रकृतमेवस्तौति

(यस्यानुवित्त इत्यादि) यस्योपासकस्यात्मा स्वात्मा गहने एति निविडे सन्देह्येऽनेकानर्थसंकुलेऽमेध्यसंकुलेस्मिन् देहात्मके वने पूर्वोपार्जितकर्मबलेन प्रविष्टो देहस्थामितामासाद्यानेकविध दुःखेन दुःखितः सन्नपि मननाभ्यासबलेन स्वात्मभूतः परमात्मा अनुवित्तोऽवगतः प्रतिबुद्धो ध्यातश्च । स विष्वकृत् स एव लोककृत् ईश्वरवत् । तत्र कारणमाह—

(स हीत्यादि) स हि सर्वस्य कर्ता सर्वस्योत्पादकः स उ लोकः तत्र लोकः आश्रयभूतः सर्वस्य जनयिता य ईश्वरस्तस्येश्वरस्यापि स ब्रह्मज्ञानी लोक एवाश्रयभूत एव भवति । "उदाराः सर्व एवैते ज्ञानित्वात्मैव मेमत"

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदीर्महती विनष्टिः ।। य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापि यन्ति ।।१४।।

यदैतमनुपश्यत्यात्मानं देवमञ्जसा ।। ईशानं भूतभव्यस्य न

मित्यादिना भगवता श्रीकृष्णेन स्वयमेव प्रतिपादनात् । भक्तवशं वदस्य भगवतः साकेताधिपतेर्ज्ञानिनं विना स्वरूपसत्ताया एवाभावात् भगवत्कृपया ब्रह्मज्ञानी सर्वत उत्कृष्टसत्तां लभते इति भावः ।।१३।।

(इहैवेत्यादि) इह एतस्मिन् विद्यमानशरीरे एव वंतमानस्त्वयम् तद्ब्रह्म यस्य ब्रह्मणो ज्ञानात् संसारसागरादुपासका मुक्ता भवन्ति तद्ब्रह्मविद्यो जानीमो ज्ञानवानित्यर्थः अथेति सम्यक् न चेदवेदिः यदी ह शरीरे ब्रह्मज्ञानं जातं तन्महती विनष्टिर्महाहानिः तत्र वेदनं वेदिर्ज्ञानम् नञो भावार्थः ज्ञानाभावोऽज्ञानम् तदेव महाहानिरिति । ज्ञानलाभस्य महाफलत्वमज्ञानप्राप्तेश्च महाहानित्वं दर्शयितुमाह–

(येतद्विदुरित्यादि) ये उपासकाः संसारविषयेभ्यो विरक्ताः सन्तः तद्ब्रह्मपरमोपास्यमनन्यया भक्त्या विदुर्ज्ञानवन्तस्ते अमृताः मोक्षभाजो भवन्ति आनन्दमयब्रह्मरूपत्वात् । अथेतरे । अथ ये इतरे ब्रह्मज्ञानविरहितास्ते दुःखं दुःखमयं संसारमेवापियन्ति प्राप्नुवन्ति । ब्रह्मव्यतिरिक्त केवल कर्माद्युपासकस्य संसार चक्रात् कदाचिदपि निवृत्तिर्न भवति किन्तु घटीयंत्रवत् तस्य संसारः सदैवानुवर्तमानस्तं सर्वदैव दुःखयतीति ।।१४।।

ब्रह्मज्ञानस्य महाफलप्रयोजकत्वं दर्शयति–

(यदैतमनुपश्यतीत्यादि) स उपासको यदा (यस्मिन् काले एनम् भूतभव्यस्य जातस्य जायमानस्य वर्तमानस्य चेशानमीशितारं देवं द्योतमानं प्रकाशलक्षणं आत्मानं परमात्मानम् । अञ्जसाद्राक् पश्यति साक्षात्करोति

ततो विजुगुप्सते ॥१५॥

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्त्तते । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥१६॥

यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः । तमेव मन्य

तदा न विजुगुप्सते सर्वस्याप्येकात्मकज्ञानात् वस्तुमात्रे निन्दा न प्रवर्तते । एकात्मज्ञानवतः परमेश्वरात् पृथक्भूत वस्तुभावात् कुत्रापितोऽघृणा न जायते इत्यर्थः ।

(यस्मादित्यादि) यस्मात् सर्वेशानात् अर्वाग् नीचैरेव तदन्यविषये एव । संवत्सरः कालात्मा संवत्सरः अहोभिः स्वावयवभूतैर्मासपक्षाहोर्भिर्दिनैः परिवर्तते परिच्छेदकत्वेन वर्तते । यतः कालपरिच्छेद आत्मव्यतिरिक्तवस्तुष्वेव भवति ततं आत्मा संवत्सरमासादिकालपरिच्छेद रहित इति ॥१५॥

(तद्देवा इत्यादि) तं परमात्मानं देवा द्योतमानाः ज्योतिषां ज्योतिर्मत्वेन प्रसिद्धानामपि ज्योतिः प्रकाशकम् । सर्वावभासकत्वं ब्रह्मण एवेति । तथा अमृतं कालापरिच्छिन्नम् आयुः सर्वप्राणिनां प्राणनक्रियाकारणीभूतम् तं परमात्मानम् उपासते उपासनां कुर्वन्ति । देवादिभिर्महानुभावैरपि उपासकस्य ब्रह्मण इत्यर्थः ॥१६॥

(यस्मिन् क्वेत्यादि) यस्मिन् अधिकरणे पंचजनाः पंचजनसंज्ञकाः पंच । च तथा आकाशश्च प्रतिष्ठितः स्थितः अत्राकाशपदं भूतान्तराणां पृथिव्यादीनामप्युपलक्षकम् । यथा इतः पूर्वमन्त्रे ज्योतिषामिति षष्ठ्यन्तपदोपात्तज्योतिशब्दो निर्णायकान्तरापेक्षस्तथैवेहापि मन्त्रे पंचजनशब्दोपि निर्णायकान्तरापेक्ष एवेति पंचत्वसंख्यान्वययोग्यत्वात् चक्षुरादिन्द्रियाण्येव ज्योतिःपदवाच्यानि भवन्ति तमेवं तादृशं पंचजनाधिष्ठान-

आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ।।१७।।

प्राणस्य प्राणमुत चक्षुसश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः ।। ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ।।१८।।

मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन ।। मृत्योः स मृत्यु-

भूतमात्मानम् एतादृगात्मैव ब्रह्मामृतममृतरूप इति विद्वान् जानन् अन्योपि पुरुषोऽमृतो भवति कालादिपरिच्छेदशून्यो भवति, कालादिपरिच्छेदादि-रहित ब्रह्म जानन् पुरुषोपि ब्रह्मवदेव कालादिपरिच्छेद शून्यो भवतीति भावः ।।१७।।

इतः पूर्वमन्त्रे प्रतिपादितम् यत् पंचजनशब्देन ज्योतिषां ग्रहणं भवति तत्र कानि तानि ज्योतींषि तत्राह–

(प्राणस्य प्राणमित्यादि) प्राणस्य प्राणम् अत्र प्राणशब्देन स्पर्श-नेन्द्रियस्य ग्रहणं भवति वायुना प्रणीनात् चक्षुषश्चक्षुरित्यनेन चक्षुरिन्द्रियं रूपप्रकाशकं परिग्रहीतं भवति श्रोत्रस्य श्रोत्रमित्यनेन शब्दग्राहकस्ये-न्द्रियस्य ग्रहणम् मनसो मन इत्यनेन मनस इन्द्रियस्य ग्रहणं घ्राणरसनयो-रपि माध्यन्दिनशाखापाठबलात् ग्रहणं भवति । यः प्राणादीन्द्रियाणा-मनुग्राहक एतादृशं परमात्मानं ये उपासका विदुर्जानाति । ते पुरुषाः पुराणं कारणरहितम् अग्र्यम् सर्वत्र विद्यमानं मित्यर्थः । ब्रह्मपरमेश्वरम् निचिक्युनिश्चितवन्तः । परब्रह्मविषयक व्यापक मित्यर्थः । ब्रह्म परमेश्वरम् निश्चिक्युर्निश्चतवन्तः । परब्रह्मविषयक निश्चयवन्तोऽभवन्निति ।।१८।।

एतादृशं ब्रह्मज्ञानं केनकारणेन भवतीति जिज्ञासायां तत्साधनं दर्शयितुमाह–

(मनसैवेत्यादि) तद्ब्रह्म मनसा अन्तःकरणेनैव अनुपश्चात् श्रवणम-ननोत्तरकालं दृष्टव्यं ज्ञातव्यम् । श्रवणमननानन्तरं दर्शनसमानाकारकस्मृति

माप्नोति य इह नानेव पश्यति ॥१६॥

एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् ॥ विरजः पर आकाशादज

धारालक्षण ध्यानं दोषा कलुषितेन मनसा सम्पादनीयम् । "एषोणुरात्मा चेतसा वेदितव्यः" इति श्रुत्यन्तरात् ब्रह्मसाक्षात्कारस्य मनःकरणकत्वप्रसिद्धेरितिभावः । ननु न ह्येकः परमात्मा अनेकेषां पंचजनभूताकाशादीनामाधारः संभवतीति यो मन्यते । तं प्रत्याह—

(नेह नानेत्यादि) इहास्मिन् द्रष्टव्ये परब्रह्मणि किंचन नानात्वं नास्ति । नानाशब्दो भावप्रधानकत्वात् नानात्मपरकः, यस्मिन्पंच पंच जना इति मंत्र प्रतिपादिते परब्रह्मणि नानात्व भेदो नास्ति । लेशतोपि तत्रभेदस्यावकाशो न भवतीति ।

(मृत्योरित्यादि) यः खलु इह समस्तप्रपंचस्याधारभूते परब्रह्मणि नानेव नाना इव । अल्पार्थक इव शब्दस्ततश्चाल्पमपि नानात्वं पश्यति बिजानाति स मृत्योः सकाशात् मृत्युमाप्नोति । अर्थात् जन्ममरणप्रबन्धोच्छेदस्तस्य कदाचिदपि न भवति । अपि तु संसारात् संसारमेव प्राप्नोति अत्यंतमेव संसारभाग् भवतीति भावः । ये केचनामुमेव मंत्रंप्रपचमिथ्यात्वेप्रमापयन्ति तेषां दुराशामात्रम् "नाभाव उपलब्धेरित्यादि" ब्रह्मसूत्रेषु आचार्येण स्वयमेव निराकरणात् । विशेषत एतत्तत्त्वम् । ब्रह्मसूत्रे एवावलोकनीयं तद्विचारस्यात्राप्रकृतत्वादिति ।

(एकधैवेत्यादि) अप्रमेयं प्रमातुमयोग्यम् कालादिसर्वपरिच्छेदरहितम् ध्रुवं निश्चलम् मेधीवत् दृढम् । एतत्सर्वेषां जडचेतनानामात्मभूतम् ब्रह्म । एकधैवैकरूपेणैव सर्वभेदरहिततयैव । अनुद्रष्टव्यं श्रवणोत्तरकालं ज्ञातव्यम् । सर्वभेदप्रत्यस्तमितब्रह्ममात्रं ज्ञातव्यमित्यर्थः । स चात्मा परमेश्वरो विरजः रजोगुणविकारभूतैरागादिदोषैरस्पृष्टः आकाशादपि परः

आत्मा महान्ध्रुवः ॥२०॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ नानुध्यायाद् बहूञ्छब्दान्वाचो विग्लापनं हि तदिति ॥२१॥

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य

अतिशयेनोत्कृष्टः यथा आकाशस्यापि कारणम् । अज उत्पत्त्यादिनकविकार रहितः महानतिव्यापको ध्रुवोऽविनाशी । एवं भूतोयमात्मा परमेश्वरः स एव ज्ञातव्य इत्यग्रिमेण संबन्धः ॥२०॥

(तमेवेत्यादि) तमेतादृशं पूर्ववर्णितमेव धीरो मेधावी विज्ञाय तादृशं परमात्मानं ज्ञात्वा श्रवणमननाभ्याम् । ब्राह्मणोऽधीतवेदः द्विजातिर्वा तेन नास्ति कथंचिदध्यात्मचिन्तने जन्मजातशूद्राणामधिकार इति । प्रज्ञां प्रकर्षेण ज्ञानं निदिध्यासनं कुर्वीत कुर्यात् । एतादृशमेवात्मानं ध्यायीतेति । बहूननेकप्रकारकानन्यान् आत्मप्रतिपादकातिरिक्तान् नानुध्यायात् न कथमपि चिन्तयेत् यतस्तत्वाचो वाण्या विग्लापनं विग्लानिसाधनं श्रमोत्पादकमेव । तदित्यत्रेति शब्दो मंत्रसमाप्तिद्योतक इति ॥२१॥

(स वा एष महानज इत्यादि) यः खलु पूर्वं निर्दिष्टः परमात्मा महानज इत्यादिना तथा योयं निर्दिष्ट आत्मा कतम आत्मा इत्यादिना । स पूर्वोपात्तः परमेश्वरः स योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरित्यादिना निर्दिष्ट जीवात्मनि शेते तिष्ठति जीवे अन्तर्यामितया वर्तते । परमेश्वरोऽन्तर्यामितया जीवे वर्तते इत्यर्थः । अत एवाग्रे वक्ष्यति आत्मान्येव जीवे एव । आत्मानं परमेश्वरं पश्यतीति । अन्तर्हृदये ज्योतिरित्यस्यार्थं आकाश इति । ज्योतिराकाशयोः स्वच्छत्वात्साधर्म्यम् । एवं चाकाशशब्दो जीवपरक

एषोन्तर्हृदय आकाशस्तस्मिञ्छेते सर्व्वस्य वशी सर्व्वस्येशानः

एव । एवं च विज्ञानमयाकाशशब्दित जीवे पूर्वोक्तमहानजो ध्रुवः परमात्मा अन्तर्यामिरूपेण वर्तते इति । यद्वा योयं विज्ञानमय इत्यत्र कतम आत्मा योयं विज्ञानमय इत्यादिना कथितस्य जीवस्य ग्रहणं न संम्भवति । महानज इत्यादिना प्रतिपादितमहत्त्वस्यासम्भवात् । किन्तु विज्ञानमय इत्यनेन साक्षादेव परमात्मनःकथनमिति केचन मन्यन्ते इति ।

(सर्वस्य वशीत्यादि) यः पूर्वं जीवे शयानोऽन्तर्यामितया परमेश्वरः प्रदर्शितः स सर्वशक्तिमान् स सर्वस्य वशी । तस्य वशे निन्यत्रणेऽधिकारे सर्वोपि वर्तते । ये इमे ब्रह्मरुद्रेन्द्रपुरोगमा देवास्तेपि अस्यैव वशे वर्तन्ते । तदुक्तमन्यत्र "एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते-तिष्ठतः" इत्यादिना परमेश्वराज्ञायां सर्वे वर्तन्ते । तथा श्रुत्यन्तरेपि कथितम् "भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" इति । अतः प्रशासनेन धारकत्वलक्षणमात्मत्वं कथितं भवति परमेश्वरे । स च परमेश्वरः सर्वस्येशानः सर्वस्यापि प्राणभृतोऽयमेव नियन्ता नियमनकर्त्ता । अत एव शैत्यं वह्नौ न संक्रामति औष्णयं वा जवे । सर्वस्येशान इति विशेषणेन नियन्तृलक्षणमात्मत्वं प्रतिपादितं भवति । स परमेश्वरः सर्वस्याधिपतिः । एतावता शेषित्वलक्षणमात्मत्व-मुक्तं भवति । य इमे वशित्वादयो गुणा अत्र परमेश्वरे कथितास्ते वशित्वा-दयो गुणाः छान्दोग्यश्रुतसत्यकामत्वापहतपाप्मत्वादिगुणानामपि संग्राह-का भवन्तस्तेषामपि सद्भावं गमयन्तीति ।

(स न साधुनेत्यादि) स सर्वस्येशिता परमात्मासाधुना कर्मणा भूयानधिको न भवति न वा असाधुना शास्त्रप्रतिषिद्धकर्मणा । कनीयान् न्यूनो न भवति । अयमभिप्रायः यथा जीवो नियम्यः शास्त्रविहितकर्मानुष्ठानेन

सर्व्वस्याधिपतिः स न साधुना कर्म्मणा भूयान्नो एवासाधुना

तज्जनितसुकृतापूर्व सहकृतो विलक्षणं सुखं स्वर्गीयमनुभवन् उत्कृष्टो भवति। यथा वा शास्त्रप्रतिषिद्धकर्माचरणेन सञ्जातदुरितापूर्वसहकृतो नरकयातनामनुभवन् हीनतमो भवति। तथा परमेश्वरः साध्वसाधुकर्मणा नोत्कृष्टो भवति न वा हीनतामेवानुभवति अपि तु निस्तरगमहोदधिकल्पः सर्वदा एकरूप आस्ते। साध्वसाधुकर्मप्रयोज्योत्कर्षापकर्षशून्य एव सर्वदावतिष्ठते इति भावः।

(एष सर्वेश्वर इत्यादि) एषो यः साध्वसाधुकर्मप्रयोज्य कल्लोल-रहितः स एव सर्वस्य प्राणिवर्गस्य जडवर्गस्य चेश्वरो नियन्ता नियामकः एष एव परमेश्वरः सर्वभूतानां चराचराणामधिपतिः शेषी अवयवी। एष एव भूतपालो भूतानां सर्वेषां पालको रक्षकः तथा एष एव परमेश्वर एषां लोकानामसंभेदायासांकर्यायविधरणो विधारकः सेतुरपि परमेश्वर एव। यदि परमेश्वरेण लोका नियन्त्रिता न भवेयुस्तदा सर्वेपि स्वस्वमर्यादारहिता भवेयुः। परमेश्वरनियन्त्रितास्तु यथाकालं यथादेशं यथाकार्यं सर्वे सर्वत्र स्वस्वमर्यादयासमवेता भवन्तो दृश्यन्ते। न हि कदाचित शालिबीजादुत्पद्यते गोधूमचणकादिकम्। तत्कस्य हेतोः ? परमेश्वरनियन्त्रणात्। अन्यथा सर्वे सर्वत्र संचरन्तो जगन्मर्यादाऽप्लावयेयुरिति। इद च परमात्मप्रकरणम्। तत्र "आत्मैवेदमग्रे आसीत्पुरुष विध" इत्यादौ देवताविशेषस्य भगवतः साकेताधिपतेरेव प्रस्तुतत्वात् तस्यैव साकेताधिपतेरेव सर्वेश्वरत्वादिगुणाः सन्ति नान्यस्येति नात्रदेवान्तराणामवकाशलेशोऽप्यस्तीति वोद्धव्यमिति। ननु कथमयं परमेश्वरो ब्रह्मेति। यतोऽस्मिन् बृहन्तो गुणाः सन्ति ततोयं ब्रह्मेति। तथाह

कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति

"नहि तस्य गुणाः सर्वे वक्तुं मुनिगणैरपि ।
वक्तुं शक्या वियुक्तस्य सत्वाद्यैरखिलैर्गुणैः ॥
नान्त गुणानां गच्छन्ति तेनानन्तोयमीरितः" इति ।
तवानन्तगुण यानि षडेव प्रथमे गुणा ॥
वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वदेवैः ।
महात्मनश्चापशरासिपाणे रामस्य जिष्णोर्वसुधाधिपस्य ।
चतुर्मुखायुर्यदिकोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः ॥
न ते गुणानामयुतैकमंशं वदेन्न वा देववर प्रसीद ॥
यथा रत्नानि जलधेरसंख्येयानि पुत्रक ।
तथा गुणा ह्यनन्तस्य ह्यसंख्येया महात्मनः ॥
इषुक्षयान्निवर्तन्ते नान्तरिक्षा क्षितिक्षयात् ।
मतिक्षयान्निवर्तन्ते न श्रीरामगुणाक्षयात् ॥
समस्तकल्याणगुणात्मकोसौ स्वशक्तिलेशाद्धृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ।

इत्यादिप्रमाणैः प्रमान्तरेण च भगवद्गुणानामनन्तत्वादवगमात् भवति परमेश्वरो ब्रह्मपदवाच्य इति ।

(तमेतमित्यादि) तमेतं पूर्वोक्तवशित्वादिसकलकल्याणगुणभाजनं परमात्मानम् । ब्राह्मणा अधीतस्वाध्याया ब्राह्मणत्वजात्याक्रान्ताः वेदानुवचनेत वेदानामनुवचनमध्ययनम् तेन वेदाध्ययनेन । यज्ञेनाग्निहोत्रादिनित्यनैमित्तिककर्मानुष्ठानेन "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् । ज्ञानं च विमलीकुर्वन् अभ्यासेन तु याचयेदि" त्यादिना कर्मानुष्ठानस्यावश्य-

यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवति एतमेव

कर्तव्यत्वप्रतिज्ञानात् । दानेन यथाशक्तिदानकरणेनापि शुद्धिसम्भवात् । अनाशकेन तपसा । न तु सर्वथानशनन् शरीरपातात् । न वा चान्द्रायणादिशीलस्य धातुवैषम्यापत्तेः । एभिर्विविदिषति ब्रह्म वेदितुमिच्छन्ति । तत्र आशोऽशनं भावे घञ्प्रत्ययः अनाशोऽनशनम् स्वार्थे क प्रत्ययः एतदनशनं कामानशनलक्षणमेव नतु सर्वात्मना भोजनाभावः । तथासति अन्नमयशरीरस्य कारणाभावेऽभावप्रसंगात् । अथवा न विद्यते आशो यस्य तदनाशं स्वार्थे कः तथा च फलाधिसन्धिरहितेन तपसा विविद्विषेदिति । अत्र यज्ञादीनां विनियोगो वेदने न तु विविदिषायामर्थात् यज्ञादीनां न विविदिषां प्रति किन्तु ज्ञाने साधनत्वम । यथा अश्वेन जिगमिषति । पद्भ्यां जिगमिषति इत्यादौ अश्वादिसाधनस्य धात्वर्थगमने एवान्वयो भवति न तु गमनेच्छायामेव, प्रकृतेपि धात्वर्थवेदने एव करणत्वं यज्ञादीनां न तु ज्ञानेच्छायाम । न च प्रकृतिप्रत्यार्थयोर्मध्ये प्रत्ययार्थस्यैव प्राधान्यमिति वैयाकरणानामुद्घोष उत्सर्गलक्षणस्ततश्च प्राधान्यमिह सनर्थ इच्छाया एवेति प्रानेनेच्छयैव जनकत्वसंबन्धेन पदार्थान्तरस्य गागादेरन्वयः स्यात् न त्वप्रधानेन वेदनेनेति वाच्यम् भावानवबोधात् । यद्यप्यन्यत्र सर्वत्र प्रत्ययार्थस्यैव प्रधान्यं भवतीत्युत्सर्गस्तथापि अश्वेन जिगमिषतीति सन्प्रत्ययान्तस्थले प्रकृत्यर्थप्राधान्यस्यैव दर्शनात्, तद्वत्प्रकृतेति प्रकृत्यर्थभूतवेदानसाधनत्वमेव वेदानुवचनादीनां तृतीया विभक्त्या प्रतिपाद्यते इति । एतत्तत्त्वं विशेषतो ब्रह्मसूत्रीयतृतीयाध्यायेंगपादे विचारितमि तत एव द्रष्टव्यमिति ।

(एतमेवेत्यादि) एतमात्मानं यदर्थमितः पूर्वं वेदानुवचनादिना विविदिषन्तीति कथितं तमेतं परमात्मानमेव विदित्वा श्रवणोत्तरकालमुपपत्तिद्वारा विनिश्चित्य निश्चयकर्ता मुनिर्भवति । मननशीलो मुनिः

प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति एतद्ध स्म वै तत्पूर्वे विद्वांसः

मनेरुच्चेति सूत्रेण मनधातो रिन् प्रत्ययं मकार।नष्ठाकारस्योकारादेशे-मुनिरित सिद्धयति तदर्थश्च मननशीलः मननं च उपपत्तिद्वारा श्रुतार्थस्य निश्चयकरणं स यः पूर्वोक्तमात्मानमुपपत्त्यादिद्वारेण जानाति स मुनिर्योगी-भवतीति । किं बहुना एतमेव पूर्वप्रकारोपदर्शितमेवात्मान लोकं लोक्यते दर्शनविषयीक्रियते इति लोकस्तम । इच्छन्तोऽभिलषन्तः प्रव्राजिनः प्रव्रजनशीला महात्मानः परिव्रजन्ति सन्यसिनो भवन्ति । ननु कथमित्थ-मुच्यते । ये प्रव्रज्यायुक्ता ते प्रव्रजिन इति कथ्यन्ते ततो यदि पूर्वमेव प्रव्रज्यावान् स कथं पुनः परिव्रजिष्यति । नहि दण्डविशिष्टे दण्डस्य विधान-मिति दण्डी दण्डवान् न भवति । तथा चौदनं पचतिवदिद वाक्यं तथापि प्रव्रज्या शब्दस्य न संन्यासोर्थः किन्तु वैराग्यमर्थः । तथा च ये विरक्ताः सांसारिकविषयेभ्यः ते सर्वोत्कृष्टमात्मनोऽभिलाषयैव सन्यासं गृह्णन्तीति । एतमेवेत्यत्रावधारणार्थक एवकारस्य श्रवणात् । आत्मलोकेतर-लोकेच्छावतामपक्ववैराग्याणां नास्त्यत्र प्रव्रज्यायामधिकार इति ज्ञायते । एतदुक्तं भवति पक्ववैराग्यवतामेव नित्यभगवल्लोकप्राप्तिमुद्दिश्य प्रव्रज्या-ग्रहणम् । अन्यथापक्ववैराग्यवता संन्यासग्रहणे वैराग्वस्यापक्ववत्वात् सन्यासोचितविधौ प्रवृत्तो न स्यात् । कर्म च नित्यनैमित्तिकमनाचरन् प्रतिक्षणमुपचीयमानपाप्मा अधोगतिं यास्यति । अतो यः सांसारिक-विषयेभ्यः सर्वथा विरक्तः भगवन्मात्रशरणस्तस्यैव भवगल्लोकप्राप्तिमु-द्दिश्य संन्यासेधिकार इति निश्चीयते । दृश्यते भविष्यति च घुष्टे कलौ अनधिकारिणां संन्यासवतां मठादावुन्नतपदे विविशमानानां महद्वि-डम्बनमिति ।

(एतद्धस्मेत्यादि) एतत् एतादृशाः पूर्वे पूर्वकालिका विद्वांसो

प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः। स एष नेति

ब्रह्मविदः प्रजां पुत्रादिलक्षणां न कामयन्ते तद्विषयककामनां न कृतवन्तः प्रजया पुत्रादिलक्षणया किं करिष्याम इति विचारयन्तः। अत्र किंशब्द आक्षेपार्थकः के इत्थं कृतवन्तः येषा नोऽस्माकमयं पुत्रादिलक्षणो लोक आत्मा परमात्मैव। प्रजालक्षणादिलोकेन योऽर्थः साधितो भवति यत्फलमाप्यते स लोकोऽस्माक परमात्मैव विद्यते। एवं ये भगवतैकशरणा ब्रह्मविदस्तेषामियमुक्तिस्ते प्रजां न कामयन्ते। एतल्लोकसाध्यसुखानुभवो यो भवति स परमात्मलोकानुभवपाथोधेर्विन्दुतुल्य एव। सर्वसुखानुभवानां परमात्मानुभवे समाविष्टत्वात् यथा कूपादिना यादृशं स्नानावगहनादिकार्यं भवति तत्सर्वं महातडागोदके समाविष्टं भवति तद्वत् प्रकृतेपीति। ततो भगवतैकशरणा ब्रह्मविदो न कामयन्ते प्रजामिति।

(ते हस्मेत्यादि) ते ह ब्रह्मविदः पुत्रैषणाया अत्र पुत्रैषणापदेन "जया मे स्यादथ प्रजायेय" इत्यादिप्रकारणेन या कथिता सा गृह्यते, वित्तैषणायाश्चेत्यनेन "वितं मे स्यादथ कर्म कुर्वीय" इत्यनेन या कथिता तस्या ग्रहणं भवति। वित्तं स्वर्णरजतादि धनविषयिणीच्छेत्यर्थः। वित्तैषणायाश्चेत्यनेन कलत्रपुत्रवित्तकर्मसाध्यसकललोकविषयिणीच्छा परिगृह्यते। पुत्रैषणाद्येषणात्रयात् व्युत्थाय। एषणात्रयं परित्यज्य यथाविधि संन्यासं परिगृह्येत्यर्थ। अथानन्तरं शरीरयात्रानिर्वाहाय भिक्षाचर्यं भिक्षाटनं चरन्ति कुर्वन्ति। एतदुपलक्षणम् सर्वसंन्यासधर्मानुष्ठानस्यात्राप्राप्तत्वेन पारिब्राज्यं विधीयते इति। या हि पुत्रैषणा सैव वित्तैषणा सा लोकैषणा। एतेषामेषणा-

नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हिशीर्य्यतेऽसङ्गो न हि सज्जतेऽसितो न व्यथते न रिष्यत्येतमुहैवैते न तरत इति अतः पापमकरवमित्यत: कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं

त्रयाणां परस्परमवर्जनीयसम्बन्धात् एने एषणे उभे एव भवतः सर्वथा साध्यसाधनविषयकैषणाद्वितयमेव परिवक्ष्यतीत्यर्थः ।

(स एष एव इत्यादि) स एष समानप्रतिष्ठाधारभूतः अथात आदेशो नेतिनेतीत्यादिना निर्दिष्टोऽयमात्मा स एषः समानप्रतिष्ठाधारभूत इति । अगृह्योरूपस्याद्यभावेनेन्द्रियग्रहणायोग्यत्वात् चक्षुरादीन्द्रिय-द्वारा न गृह्यते कथमपि गृहीतो ग्राह्यो न भवति । अशीर्यः खण्डयितु-मयोग्यो निरवयवत्वात् न शीर्यते विशीर्णो न भवति कथमपि । असंगः सर्वलेपरहितत्वात् न कुत्रचिदपि सज्जते पापात्मकदुरदृष्टफलं दुःखेना-नुभवति । असितोऽस्त्रादिना न व्यथते व्यथां दुःखं नानुभवति, न वा शस्त्रादिना रिष्यति हिंसितो भवति कर्मबन्धनराहित्येन दुःखभाग् न भवति न वा हन्तेः कर्म कदाचिदपि न भवतीति ।

(एत मु इत्यादि) अतोऽस्मात शरीरयात्रालक्षणात् हेतोः पापमकरवं पापकर्मणः अनुष्ठानं कृतवान् तेन मे नरकपातो भविष्यति । कल्याण-मकरवम् कल्याणकर्मणोऽनुष्ठानं नाहं कृतवानित्याकारिके उभे अपि चिन्ते एनं पूर्वोक्तं ब्रह्मज्ञानिनमधिकारिणं न तरतो न स्पृशतः पाप-पुण्यचिन्तापि अपगता भवति । सर्वदुरितनिवृत्तिलक्षणब्रह्मज्ञानलक्षण-महाफलस्य प्राप्तत्वादिति भावः । कथं पापपुण्ययोः स्पर्शो न भवति । ब्रह्मज्ञानिनां तत्र कारणं दर्शयितुमाह--

(उहैवैष इत्यादि) उ ह यस्मात्कारणात एष ब्रह्मज्ञानी एतस्मि-न्शरीरस्थितिनिर्वर्तकभूलोके वसन् एते पुण्यपापे तरति तीर्णवान् तत

कृताकृते तपतः ।।२२।।

तदेतदृचाभ्युक्तमेष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्म्मणा नो कनीयान् तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्म्मणा पापकेनेति तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः

एनं ब्रह्मज्ञानिनं कृताकृते: कृतं शास्त्रविहिताग्निहोत्रादिजनितं सुकृतम् । अकृतं शास्त्रप्रतिषिद्धकर्मानुष्ठानेन जनितं दुष्कृतम् । एते सुकृतदुष्कृते ब्रह्मज्ञानिनं यतो न तपतः स्वकीयं स्वकीयं फलं नानुभावयतः ब्रह्मज्ञानेनाग्निना तज्जनकलाशक्तेर्विनाशितत्वात् । ते फलसम्बन्धिनं कर्तुं न प्रभवतः । एवंविदि पापं कर्म न श्लिष्यते इत्यश्लेषश्रवणादिति ।।२२।।

(तदेतदित्यादि) तदेतत् ब्रह्मज्ञानिनां पुण्यपापस्पर्शो न भवतीति अधिकृत्य ऋचामन्त्रेणाभ्युक्तम् कथितम् । स्वरूपतस्तां ऋचं पठति ।

(एष नित्य इत्यादि) ब्राह्मणस्य ब्रह्मज्ञानिन एष महिमा महत्त्वं नित्यः स्वभावसिद्धः ब्रह्मज्ञानोत्तरकालं यावदात्मभावितय नुवर्तते एवेति । किमाकारकोयं ब्रह्मज्ञानिनां महिमा तत्राह—

(नो वर्धते इत्यादि) कर्मणा शुभात्मकेन पुण्यात्मककर्मणा न वर्धते शुभाख्यकर्मणाऽतिशयवान् न भवति । न वा कर्मणा पापात्मकेन कनीयान् हीनो न भवति । शुभाशुभप्रयोज्यवृद्धिह्रासवान् न भवतीत्यर्थं । तस्यैव स्यात् पदवित् । स यस्यायं महिमा स तस्य ब्रह्मणः यत्पदम् स्वरूपं पद्यते प्राप्यते इति पदं स्वरूपं तत् वित् भवति ब्रह्मस्वरूपज्ञाता भवतीत्यर्थः । स ब्रह्मस्वरूपवित् पुण्यपापात्मककर्मप्रयोज्योत्कर्षापकर्षशून्यो भवति । एतादृशो हि महिमा ब्रह्मविदामिति । पूर्वोक्तमहिमज्ञानफलं दर्शयति ।

समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं

(तं विदित्वेत्यादि) तं ब्रह्मविदो मानं विदित्वा सम्यगवगत्य पापकेन संसारजनकेन शुभाशुभेन कर्मणा न लिप्यते तादृशकर्मप्रयोज्यलेपरहितो भवतीत्यर्थः ।

(तस्मादेवं विदित्वादि) यस्मात् कारणाद् ब्रह्मविद् एवं महिमा तस्मात्कारणात् एव वित् शास्त्रजनितज्ञानवान् शान्तः शमयुक्तः तत्र शमो नाम अन्तरिन्द्रियनिग्रहलक्षणः, दान्तो दमयुक्तः दमोनाम बाह्येन्द्रियनियमन लक्षणः उपरत उपरतिमान् । शास्त्रप्रतिषिद्धकाम्यादिकर्मसूपपरमणमुपरतिः । तितिक्षुः तितिक्षा क्षमा तद्युक्तः सर्वप्राणिसु क्षमाशीलोभूत्वा समाहितः समाहितचित्तः एवं यथोदितलक्षणको भूत्वा आत्मनि जीवात्मनि आत्मानं परमात्मानम् जीवान्तर्यामिणं पश्यति पश्येत् । तथा आत्मानं परमेश्वरं साकेताधिपतिं सर्वं सर्वशरीरकं सर्वे जडचेतनः शरीरं विद्यते यस्येत्थं भूतं च तं पश्यति पश्येत् जीवेपरमात्मानं सर्वशरीरकं पश्येदित्यर्थः ।

(नैवं पाप्मेत्यादि) एनं ब्रह्मविदं पाप्माशुभाशुभलक्षणं विहितप्रनिषिद्धजनितं कर्म न तरति न प्राप्नोति । अयं तु ब्रह्मज्ञानी सर्वं पाप्मानं पुण्यपापलक्षणं कर्म तरति सर्वपाप्मभ्योऽतिक्रान्तो भवति भगवत्कृतया सर्वपाप्मविनिर्मुक्तो भवतीति भावः ।

(नैनं पाप्मा तपतीत्यादि) एनं पूर्ववर्णितं ब्रह्मज्ञानिनं पाप्मा शुभाशुभं कर्म न तपति न बाधते स्वफलानुभवद्वारेण बाधनालक्षणं दुःखं नोत्पादयति प्रत्युतायमेव ब्रह्मज्ञानी सर्वं पाप्मानं पुण्यपापलक्षणं तपति बाधते दहतीत्यर्थः । अयमाशयः "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन । नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति भगवद्वचनेन

पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजो विचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान् ददामि

ज्ञानी भक्तः सर्वं शुभाशुभकर्मवह्निस्तूलराशिवत् समूलकाषंकषति । तत्र यानि संचितानि क्रियमाणानि तेषां दाहो ज्ञानाग्निना भवति, प्रारब्धकर्मणां विनशस्तु यावज्जीवं भगवत्कैंकर्यंकरणादेव भवतीति विवेक इति भावः। प्रकरणार्थमुपसंहरन्नाह ।

(विपापो विरजइत्यादि) सोयं ब्रह्मज्ञानी ज्ञानाग्निदग्धकर्मा-विपाकः विगतपाप शुभाशुभलक्षणं यस्मात्सविपापः पापरहितः विरजो विगत रजो यस्मात्तत्तथा विराग इत्यर्थः अविचिकित्सः न विद्यते विचिकित्सा यस्य स अविचिकित्सः सर्वप्रकारकसंशयशून्यः "भिद्यते हृदय-ग्रन्थिः छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इत्यादिश्रुत्यन्तरात् । सर्वप्रकारकसन्देहरहितः ब्राह्मणो भवति ब्रह्म-विद्भवतीत्यर्थः । अत्र यद्यपि ब्राह्मण इति शब्दः पश्चात् निर्दिष्टत्वात् विधेय इवाभाति तथापि ब्राह्मणशब्दस्यौचित्यादुद्देश्यसमर्पकत्वमेवेति । एवं च ब्राह्मणो ब्रह्मज्ञानबलात् विगतपापो विरजो भवतीत्यर्थः सम्पद्यते इति"

(एष ब्रह्मलोक इत्यादि) हे सम्राट् आत्मन्येवात्मानं पश्येदित्यादिना द्रष्टव्यतयोक्तो यः एष एव ब्रह्मलोको ब्रह्मैव लोकोब्रह्मलोक एवं प्रकारेण याज्ञवल्क्यो राजानं वैदेहं प्रत्युवाच प्रोक्तवानिति ।

(सोहमित्यादि) याज्ञवल्क्यस्यैवं वचनं श्रुत्वा राजा जनकः प्राह हे याज्ञवल्क्य! सोहं भवद्भिरनुशिष्ट ब्रह्मविद्योहं भगवते पूजावते विदेहान् सर्वमेव विदेहराज्यं भवते ददामि प्रयच्छामि मां स्वकीयं देहमपि दास्याय पादप्रक्षालनादिसेवार्थं ददामि इत्येवं क्रमेण राजाजनकस्तमुवाचेति

माश्चापि सह दास्यायेति ॥२३॥

स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु य एवं वेद ॥२४॥

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्माभयं भाव: ॥२३॥

एवं प्रकारेण जनकयाज्ञवल्क्याख्यायिकायां यः परमात्मोपास्यतया प्रतिपादितः स उपासनाभेदेनोपासनाकर्त्रे भोगं मोक्षं च ददातीति श्रुतिर्दर्शयति–

(स वा एष महानज इत्यादि) स वा एष महान् सर्वव्यापकोऽजो नित्य उत्पत्तिविनाशरहितः आत्मा अन्नादो वसुदानो वसुदानो धनदातेति क्रमेण य उपासक एवमनेनप्रकारेण वेद विजानाति तदुपासनं करोति स उपासको वसुलोकभोग्यं सुवर्णगवादिकं धनं विन्दते प्राप्नोति। ननु धनादिफलदायकत्वं कर्मणः कार्यं तत् कथमीश्वरप्रसादात् तत् स्यादिति चेन्न फलमत उपपत्तेरितिसूत्रे कर्माराधितात् परमपुरुषादेव सर्वं फलं प्राप्नोत्याराधकः सेवाराधितराजवदित्यादिना समाहितत्वात् इति ॥२४॥

तदेवं परमात्मनो लौकिकफलप्रदत्वं प्रदर्श्य मोक्षं प्रदत्वं दर्शयितुमाह–

(स वा एष महानज इत्यादि) स वा एष महान् सर्वव्यापकः आत्मा परमेश्वरः अजरो जरया रहितः अमरो मरणधर्मशून्यः असंसारीत्यर्थः अभयं भयरहितः एतादृश आत्मा ब्रह्म निरतिशयं बृहत्। कुत एवं तत्राह–

(अभयं वै ब्रह्मेति) अमृतमभयमेतद्ब्रह्मेति निरुपाधिका भयत्वाश्रयत्वस्य परब्रह्मत्व प्रसिद्धेः। एतादृशविज्ञानस्य फलं दर्शयितुमाह–

(अभयं वै ब्रह्म भवतीत्यादि) य उपासकः अजरामरादिविशिष्टं

वै ब्रह्माभय ।ह वै ब्रह्म भवति य एवं वेद ॥२५॥

इति बृहदारण्यकोपनिषद् चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥

परमात्मानं वेद विजानाति तादृशधर्मविशिष्टस्य ब्रह्मण उपासनं करोति स अभयं ब्रह्म भवति आविर्भूतब्रह्मस्वरूपो भवति । यद्यपि पपमात्मनोऽवयवरूपत्वात् प्रागापि जीवो ब्रह्मलक्षण एव तथापि उपासनया तिरस्कृतकर्मजाल आविर्भूतब्रह्मस्वरूपो भवति, मलघर्षणेन स्वच्छादर्शादिर्ति ॥२५॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥
